71. B दृष्ट्वा रयेणोन्नतचापदंड , C दृष्ट्वा रयेणायतचापदंड , D. दृष्ट्वा विकृष्टायतचापदंड , Fr दृष्ट्वा जवेनायतचापदंड for दृष्ट्वा प्रसह्यायतचापदंड . Fr Sumangala reads —दृष्ट्वा गतं चायतचापदंड . C. agrees with the Sinhalese edition D. तमन्वगात् for तमन्वयात्.

72. D. वितीर्य for विलंघ्य. D नृपसायकानां for नृपमार्गणानां Fr. रेषायमाण for रेखायमाण . D जवेन for रयेण. C तपस्याभवनं for तपस्यद्भवन

73 C धनुर्धर सोऽश्मवति for धनु सहायोऽश्मवति D. वहनीययोग्यं, Fr. वहनीययोग्य for सहसा नृवीर . The readings of D, Fr appear to us either corrupt or mistakes of scribes Fr चचाल for चचार D. तत्पदबद्धदृष्टि for तत्पदद्त्तदृष्टि

तटेऽपि तस्या घटपूरणस्य
　श्रुत्वा रवं बृंहितनादशङ्की ।
शरं शरण्योऽपि मुमोच बाले
　मुनेस्तनूजे मनुवंशकेतुः ॥ ७४ ॥
पुत्रो मुनेः पत्रिविभिन्नमर्मा
　शरानुसारेण नृपं प्रयातम् ।
नेत्राम्बुदिग्धेन विलापनाम्ना
　वाणेन भयो हृदि तं जघान ॥ ७५ ॥
त्वया त्वनाथस्य विचक्षुषः किं
　भग्नोऽयमालम्बनदण्ड एकः ।
वने जरावेशजडीकृतस्य
　गुरुद्वयस्य व्रतजीर्णमूर्तेः ॥ ७६ ॥
एकं त्वया साधयतापि लक्ष्यं
　नीतं विनाशं त्रितयं निरागः ।
मच्चक्षुषा कल्पितदृष्टिकृत्यौ
　वृद्धौ वने मे पितरावहं च ॥ ७७ ॥

74. C. कूलेऽपि for तटेऽपि D. Fr. स्वनं for रवं D. ट्टंहितनाद° for बृंहितनाद°. C तस्मिन् for बाले.

75. C. बाल for पुत्र C. बाणविभिन्नदेह for पत्रिविभिन्नमर्मा C शरानुयातेन, D. बाणानुसारेण for शरानुसारेण C. प्रभुं for नृपं D नेत्राम्बुलिप्तेन for नेत्राम्बुदिग्धेन. D. तनूंह for जघान. Corrected to this in the margin of D.

76. D. त्वनाथस्य for त्वनाथस्य. D. भिन्न for भग्न D एकोऽरण्ये for एको वने. Corrected to this in the margin of D

77. B Fr लक्षं for लक्ष्यं D. मदृष्टित· for मच्चक्षुषा D. कल्पितनेत्रकृत्यौ for कल्पितदृष्टिकृत्यौ. D. जीनौ, Fr. जीर्णौ for वृद्धौ.

वनेषु वासो मृगयूथमध्ये
क्रिया च वृद्धान्धजनस्य पोषः ।
वृत्तिश्च वन्यं फलमेषु दोषः
संभावितः को मयि घातहेतुः ॥ ७८ ॥

व्रती विनाथो विगतापराधः
स्मर्तव्यदृष्टेः पितुरन्धयष्टिः ।
इत्येषु किं निष्करुणेन कश्चि-
दवध्यभावे गणितो न हेतुः ॥ ७९ ॥

तरुत्वचोऽयं कठिना वसानो
वनेषु शीतोष्णनिपीतसारः ।
अस्वादुवन्याशनजीर्णशक्तिः
पात्रं कृपायास्तव वध्यभूतः ॥ ८० ॥

जीर्णो जतुन्यासनिरुद्धरन्ध्रः
कुम्भश्च मौञ्जी तरुवल्कलश्च ।
एतेषु यन्मां विनिहत्य गम्यं
तद्गृह्यतामस्तु भवान्कृतार्थः ॥ ८१ ॥

---

78 C. जन्मान्धजनस्य for वृद्धान्धजनस्य D प्राणघात for घातहेतु. Corrected to प्राणघात in the margin of D, it is impossible to make out the original reading of the Ms

79 C. व्यपेतदृष्टे, D. प्रध्वस्तदृष्टे for स्मर्तव्यदृष्टे

80 B अयं वसान· कठिनास्तरुत्वच, D अयं वसान कठिनं तरुत्वचं for तरुत्वचोऽयं कठिना वसानो. D. with Dharmârâma; but that reading is grammatically incorrect. C वसानोऽरण्येषु for वसानो वनेषु D शीतोष्ण-निगीर्णसार for शीतोष्णनिपीतसार D. क्षीणशक्ति for जीर्णशक्ति. D पद् कृपायाः for पात्रं कृपाया

81 D. जीर्ण जतुन्यासनिरुद्धरन्ध्रं भाण्डं च, Fr जीर्णो जतुन्यासपिनद्धछिद्रः कुंभश्च for जीर्णो जतुन्यासनिरुद्धरंध्र कुंभश्च C. तरुवल्कलं च for तरुवल्कलश्च.

साधुः कृपामन्थरमक्षि शत्रौ
प्रीत्यर्थसंमीलितमादधाति ।
नीचस्तु निष्कारणवैरशील-
स्तत्पूर्वसंपादितदर्शनेऽपि ॥ ८२ ॥
स्वं हेतवे हेतिबलोपनीत-
स्मयः किमप्युन्नतवृत्ति कस्मै ।
नीचस्य निष्ठामधिकर्म गच्छन्
कुलं कलङ्कैः कलुषीकरोषि ॥ ८३ ॥
मैवं भवानेनमदुष्टभावं
जुगुप्सतां स्माक्षतसाधुवृत्तम् ।
इतीव वाचो निगृहीतकण्ठैः
प्राणैररुध्यन्त महर्षिसूनोः ॥ ८४ ॥
भोज्याः सुतश्चारुभुजद्वयेन
घटं गृहीत्वा घटितारिनाशः ।
बाष्पायमाणो बहुमानपात्रं
यमप्रभावो यमिनं ददर्श ॥ ८५ ॥

---

82. D दुष्ट Fr पाप for नीच.

83 D त्वं हेतवे हेतिबलोपनीतो, Fr स्वं हेतवे हेतिबलोपनीतो for स्वं हेतवे हेतिबलोपनीत° D गर्व° for °स्मय D. निष्टस्य for नीचस्य. C. reads the following for the third line —निष्टस्य गच्छन्नधिकर्मनिष्ठा C. agreeing with the Sinhalese edition.

84. C. reads the first two lines thus – जुगुप्सत स्मैनमदुष्टभावं मैवं भवानक्षतसाधुवृत्तं Agreeing with the Sinhalese edition D जुगुप्सति स्म, Fr. जुगुप्सत स्म For जुगुप्सतां स्म. The readings of these Mss. appear to us corrupt.

85. A B. भोज्यासुत° for भोज्या° सुत C रम्यभुजद्वयेन, D. कान्तभुजद्वयन, Fr. काम्यभुजद्वयेन for चारुभुजद्वयेन D. कुंभं गृहीत्वा कुभटारिकेतु for घटं गृहीत्वा घटितारिनाश D वाष्पायमाण° for बाष्पायमाण. D. यमिनां for यमिनम्.

पापं विधायापि विधातृतुल्ये
सत्यापयामास सतां पुरोगः ।
ततो यतिं घातयतो न सद्यः
क्रोधानलेनास्य ददाह देहम् ॥ ८६ ॥

दयानुयातस्तनयस्य नाशं
श्रुत्वा महर्षिर्मुहुरात्तशोकः ।
दिदेश देशस्तुतसद्गुणाय
विशं वशी विश्वभुजं स शापम् ॥ ८७ ॥

वनजकसुमधारिणीमलङ्घ्यां
हरिनखपातविपाटितोरुगण्डाम् ।
श्रियमिव नृपतिर्मृगव्यभूमिं
चिरमनुभूय गृहोन्मुखो बभूव ॥ ८८ ॥

अथ स विषमपादगोपितार्थं
जगदुपयोगवियुक्तभरिधातुम् ।
बहुतुहिननिपातदोषदुष्टं
गिरिमरहत्कुकवेरिव प्रबन्धम् ॥ ८९ ॥

---

86 D. मुनिं for यतिं D कोपानलेन, F1 रोषानलेन for क्रोधानलेन. D. ततापं कायम् for ददाह देहम्

87 Fr कृपोपनीत for दयानुयात D मृत्युं for नाशं D Fr. भूशदु खित सन् for मुहुरात्तशोक . C विशन्वशी for विशं वशी

88. C. °वाहिनी, D °पोषिणी for °वारिणी. C °घातविदारितोरुगण्डा. D. °पातविचूर्णितोरुगण्डा, Fr °पातविदारितोरुगण्डां for °पातविपाटितोरुगण्डाम्

89. B गिरिमसृजत्, C धरमरहत् D नगमसुचत्, Fr. नगमसृजत् for गिरिमरहत् Our Ms B. agrees with the Sinhalese edition.

सपदि दिशि निबद्धभूरिघोषं
परमविनीतमनोज्ञनागवृन्दम् ।
जलधिमिव नृपः पुरं स्वकीयं
मणिगणमण्डितकान्तमाससाद ॥ ९० ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य कृतौ दशरथोत्पत्तिर्नाम प्रथमः सर्गः ॥

---

90. D. झटिति for सपदि. C. निशि for दिशि D Fr. आजगाम for आससाद.

द्वितीयः सर्गः ।

—.o—

रावणेन रणे भग्ना देवा दावाग्नितेजसा ।
द्रष्टुं जगत्पतिं जग्मुः पुरस्कृतपुरन्दराः ॥ १ ॥
निजदेहभराक्रान्तनागनिश्वासरंहसा ।
गतागतपयोराशिपातालतलमास्थितम् ॥ २ ॥
आसीनं भोगिनि स्रस्तमौलिमाल्यविभूषणम् ।
तत्क्षणत्यक्तनिद्रार्तिबद्धरागायतेक्षणम् ॥ ३ ॥
भुजङ्गपृथुकारूढमातङ्गमकराश्रयम् ।
युद्धमम्भोनिधिच्छेदे पश्यन्तं नृपलीलया ॥ ४ ॥
भोगिभोगासनक्षोभो माभूदिति सुदूरतः ।
भक्त्यानतशरीरेण सेव्यमानं गरुत्मता ॥ ५ ॥
अर्करश्मिभयेनेव पातालतलमास्थितम् ।
लक्ष्मीमुखतुषारांशौ प्रीत्या व्यापारितेक्षणम् ॥ ६ ॥
स्वमुखे संचरद्दृष्टेरङ्कविन्यस्तपार्ष्णिना ।
स्पृशन्तं पादपद्मेन पद्माया नाभिमण्डलम् ॥ ७ ॥

---

1 C भिन्ना, D छिन्ना for भग्ना D. लेखा. for देवाः. D. सन्तु for जग्मु

2 D °कायभराक्रान्तभोगि° for °देहभराक्रान्तनाग° C गतागतपयोराशिम् for गतागतपयोराशि° D °तलसुस्थितं for °तलमास्थितं

3 D चक्रिणि for भोगिनि D °मालाविभूषणं for °माल्यविभूषणं. D. तत्क्षणोत्सृष्ट° for तत्क्षणत्यक्त°.

4 D °मातङ्गमकरालयं for °मातङ्गमकराश्रयं D. अम्भोनिधिखण्डे for अम्भोनिधिच्छेदे. C. हेलया स्वयम्, D लीलया स्वयम्, Fr राजलीलया for नृपलीलया.

5 D °क्रोध· for °क्षोभ D भक्त्यावर्जितदेहेन for भक्त्यानतशरीरेण Fr. भुज्यमानं for सेव्यमानं

6 C मित्ररश्मि°, D सूर्यरश्मि° for अर्करश्मि° A. C. °तलसुस्थितम् for °तलमास्थितम्. Fr पद्मामुख° for लक्ष्मीमुख° D. प्रेम्णा for प्रीत्या

7. C विक्षिपद्दृष्टे for संचरद्दृष्टे C अंकनिक्षिप्त° for अंकविन्यस्त°. D. मृशन्तं for स्पृशन्तं C. वलिमण्डलं, D वलिवर्तुलं for नाभिमण्डलं

सव्यापसव्यभागस्थपाञ्चजन्यसुदर्शनम् ।
तटद्वयस्थचन्द्रार्कविन्ध्यशैलमिवोच्छ्रितम् ॥ ८ ॥
पुरुषं पुरुहूताद्या नत्वा गीर्वाणसंहतिः ।
सनातनं स्कन्नशक्तिरूचे नुतियुतां गिरम् ॥ ९ ॥
समुद्रमथने यस्य भ्रमन्मन्दरखण्डिताः ।
तारा इव दिशो ववुः प्रदीप्ताङ्गदकोटयः ॥ १० ॥
येन दुर्वारवीर्येण सागराम्बरचन्द्रमाः ।
शङ्ख पातालपालानां यशःपिण्डमिवोद्धृतम् ॥ ११ ॥
यमंसद्वयसंसक्तचन्द्रादित्याङ्गदश्रियम् ।
नेमुस्त्रिविक्रमे देवास्ताराहाराङ्कवक्षसम् ॥ १२ ॥
मन्थवातभ्रमन्मेघनक्षत्रादित्यमण्डलम् ।
पुरा निमथितं येन व्योमापि सह सिन्धुना ॥ १३ ॥

---

8. D. पार्श्वस्थ° for भागस्थ°. C चन्द्रार्क, D. सोमार्क° for चन्द्रार्क°. C. Agreeing with Dharmàráma D. उन्नतं for उच्छ्रितं.

9. B reads the following for our text, नत्वा नुतियुतां स्कन्नशक्तिरूचे सनातनं पुरुषं पुरुहूताद्या गिरं गीर्वाणसंहति ॥ Agreeing with the Sinhalese edition Fr नत्वा नुतियुतामूचेस्कन्नशक्ति सनातनं D गीर्वाणसंहति forगीर्वाणसंहति C. सन्नशक्ति for स्कन्नशक्ति C स्तुतियुतां, D नुतिप्रुतां for नुतियुतां Corrected to नुतिप्रुतां in the margin of D.

10. D. समुद्रमंथने for समुद्रमथने. C भ्रम्यन्मन्दरषण्डिता ,D भाम्यन्मन्दर खण्डिता for भ्रमन्मन्दरखण्डिता C दिशा for दिश Corrected to this in the margin of C , D भासुराङ्गदकोटय for प्रदीप्ताङ्गदकोटय .

11. D. Fr. सागराम्बरचन्द्रम for सागराम्बरचन्द्रमा The Mss D Fr. agree with K. Dharmáráma and H Sumangala C. शंख for शंखं B. यश पिण्ड इव, D. यश पुञ्जमिव for यश पिण्डमिव

12. D. यमंशद्वय° for यमंसद्वय°. B. C ताराहारांकवक्षस्कं देवा!नेमुस्त्रिविक्रमे for नेमुस्त्रिविक्रमे देवास्ताराहाराङ्कवक्षसम् The reading of our Mss. B C is also supported by H. Sumangala

13. D. चक्रवात° for मंथवात°. Fr. सिन्धुना समं for सह सिन्धुना.

नाभिपद्मस्पृशौ भीमौ येन मायाशयालुना ।
पाणिभिः पाटितौ कामं कीटवन्मधुकैटभौ ॥ १४ ॥
सर्वं लोकत्रयं यश्च संहृत्य शयनं गतः ।
दृश्यते सलिलस्कन्धः सान्द्रीभूत इवोदधौ ॥ १५ ॥
तस्मै स्मरणमात्रेण तुभ्यं सद्यस्तमोनुदे ।
नमः सत्त्वमधिश्रित्य त्रैलोक्यं परिरक्षते ॥ १६ ॥
स्थितिनिर्माणसंहारभेदयोगेन भेदितः ।
त्रिधा ते समभूद्योगः स्पृष्टसत्वरजस्तमाः ॥ १७ ॥
कुक्षौ तव परिश्रम्य पश्यन्विश्वं विशाम्पतिः ।
विवेद त्वां विदामग्र्यस्त्रैलोक्यभरसासहिम् ॥ १८ ॥
एवं भक्त्या जगन्नेता नुतो नाकस्य भोक्तृभिः ।
हरिर्हारि हितं वाक्यं जगाद गदनाशनः ॥ १९ ॥

---

14. D Fr. घोरौ for भीमौ D. पशुवन्मधुकैटभौ for कीटवन्मधुकैटभौ Corrected to पशुवन्मधुकैटभौ in the margin of D.

15. D सर्वलोकत्रयं for सर्वं लोकत्रयं Fr सान्द्रिभूत इवोदधे for सान्द्रीभूत इवोदधौ.

16. A. reads the following for our text -तस्मै सत्त्वमधिश्रित्य त्रैलोक्यपरिरक्षिणे । सद्य स्मरणमात्रेण नमस्तुभ्यं तमोनुदे ॥ Agreeing with the Sinhalese edition. D तमोभिदे for तमोनुदे. C. त्रैलोक्यपरिरक्षिणे, D त्रिलोकीपरिरक्षिणे for त्रैलोक्यं परिरक्षते

17. Fr. °निर्वाण° for °निर्माण°. C. त्रिधा समभवद्योग . D. त्रेधा ते समभूद्योग. for त्रिधा ते समभूद्योगः.

18 D. Fr. read तव कुक्षौ परिश्रम्य विदामग्र्यो विशां पति । क्षमापयत्रवेद त्वां विश्वं पश्यन्भृशं भरं for our text. But the verse. appears to us. incorrect and corrupt

19. For the first line A reads the following -जगन्नेता नुतोऽथैवं भक्त्या नाकस्य भोक्तृभि Agreeing with the Sinhalese edition. C. भक्त्यार्थैवं जगन्नेता for एवं-भक्त्या जगन्नेता D. जगत्कर्ता for जगन्नेता. C D स्तुत स्वर्गस्य भोक्तृभि for नुतो नाकस्य भोक्तृभि . C. D बभाण भगनन्दन for जगाद गदनाशन .

प्रबलारिबलप्राणविक्रियाहेतुहेतयः ।
किं नु स्कन्नौजसो जाता देवा दैवक्षता इव ॥ २० ॥
हरेर्ध्यानारुणा शोकक्षामा नेत्रपरम्परा ।
बिभर्ति किं परिम्लानरक्तोत्पलवनश्रियम् ॥ २१ ॥
पाशपाणिरसाविष्टविग्रहो वनगोचरः ।
वीरोऽपि वरुणः केन क्षुद्रः पाशीव पीडितः ॥ २२ ॥
किमयं शोकसंतापैर्मातरिश्वा कृशोऽपि सन् ।
भूरिभिर्निजनिःश्वासैः पुनरेवोपचीयते ॥ २३ ॥
संपद्ध्रुवपरावृत्तिरेवं विधिनिबन्धना ।
शोकविश्वभुजा सोऽयं दह्यते दहनोऽपि सन् ॥ २४ ॥
संप्राप्तजडिमा भानुस्तीव्रतापश्च चन्द्रमाः ।
किमेतौ वहतो देवौ धामव्यत्ययविप्लवम् ॥ २५ ॥

---

20 D Fr. प्रबलारिचमूप्राण° for प्रबलारिबलप्राण°. Fr. हतौजसः for स्कन्नौजस

21 D. दु खक्षामा for शोकक्षामा D. Fr. चक्षु परम्परा for नेत्रपरम्परा B. C. धत्ते किं नु for बिभर्ति किं Corrected to धत्ते कि नु in the margin of D. but the original reading is distinct in the text and the correction is therefore unnecessary.

22 Fr has —वीरोऽपि वरुण केन क्षुद्र पाशीव पीडित । पाशपाणिरसाविष्टविग्रहो वनगोचर Agreeing with the Sinhalese edition. B. C क्षुद्रपाशीव पीडित°, D. क्षुद्र पाशीव क्लेशित for क्षुद्र पाशीव पीडित

23 D. दु खसंतापै for शोकसंतापै, C भूरिभिर्दीर्घनि.श्वासैः, D. Fr. बहुभिर्दीर्घनि.श्वासै. for भूरिभिर्निजनि श्वासै .

24. D. इत्थं for एवं. D Fr. विधिनियोजना for विधिनिबंधना. Fr. मन्युविश्वभुजा for शोकविश्वभुजा. Corrected to मन्युविश्वभुजा in the margin of Fr

25. C. संप्राप्तजडिमा मित्र , D. संलब्धजलिमा सूर्य for संप्राप्तजडिमा भानु°. C तीक्ष्णताप., D. Fr. चण्डताप for तीव्रताप . B. बिभृतः for बहतः. Agreeing with the Sinhalese edition.

शुचैव सगदः सोऽहं भयः किं धतयानया ।
इति त्यक्ता गदा नूनं मित्रेण गिरिधन्वनः ॥ २६ ॥
लाघवं केन कीनाशे कृतं सायुधवाहने ।
रक्षके महिषस्यैवं दण्डहस्ते शिशाविव ॥ २७ ॥
कल्पानिल इवावार्यः स्कन्दो दैन्यं किमास्थितः ।
प्रेरकः शिखिनो भीमः शक्त्या पातिततारकः ॥ २८ ॥
आहत्य हृतसर्वास्त्रा भ्रूधनुर्मात्रधारिणी ।
कटाक्षशरशेषेयं चण्डी केन कृता रणे ॥ २९ ॥
प्रमथानामधीशस्य माथकस्यासुरद्विषाम् ।
कूटस्थोऽपि मदः शोषवैकृतं किं नु सेवते ॥ ३० ॥
वक्त्रश्वासाग्निपिङ्गाङ्गकर्कोटाबद्धकन्धरः
नागशोणितदिग्धास्यस्ताक्ष्यों राजशुकायते ॥ ३१ ॥

---

26 B. C Fr भानुना नगवन्वन for मित्रेण गिरिधन्वन Corrected to this in the margain of C It is difficult to make out the original reading of this Ms.

27 D. Fr. लघुत्वं for लाघवं Corrected to लघुत्वं in the margin of Fr ; D. दण्डपाणौ for दण्डहस्ते

28. B. कल्पानिलमिवावार्य for कल्पानिल इवावार्य Agreeing with the Sinhalese edition C गुह कि दैन्यमास्थित . D. गुहो दैन्यं किमास्थित· for स्कन्दो दैन्यं किमास्थित· C शुम्भणो भीम , D. शुम्भणश्चण्ड for शिखिनो भीम . D Fr प्रभावहततारक· for शक्त्या पातिततारक .

29 C. प्रहत्य for आहत्य C केन काली कृता मृधे. D केन गौरी कृता रणे, Fr. काली केन कृता मृधे for चण्डी केन कृता रणे.

30 D. Fr मथानस्य for माथकस्य D शोषविकृतं for शोषवैकृतं. Corrected to this in the margin of D.

31 C मुखोच्छ्वासाग्रि°, D. तुण्डश्वासाग्रि for वक्त्रश्वासाग्रि D. °कर्कोटा-नद्ध° for °कर्कोटाबद्ध° D Fr सर्पशोणित for नागशोणित Corrected to सर्पशोणित° in the margin of D.

साग्निजिह्वातडिज्जालनद्धा चास्य फणावली ।
किं नु म्लायति वर्षान्ते घनश्रेणीव वासुकेः ॥ ३२ ॥
पृष्टवन्तमिति प्रष्टुः प्राज्ञः प्राञ्जलिरव्ययम् ।
धिषणो धिषणागम्यं जगाद जगदीश्वरम् ॥ ३३ ॥
त्वया विज्ञातमेवेदं सर्वज्ञ पुनरुच्यते ।
असौहित्यं हि भृत्यानां स्वामिनि स्वार्तिजल्पने ॥ ३४ ॥
मानिनामग्रणीरस्ति पुलस्त्यसुतसंभवः ।
दर्पोद्धतजगद्रक्षो रक्षोनाथो दशाननः ॥ ३५ ॥
स महौजा जगन्नाशफलाय फलसाधनः ।
निर्विकारश्चिरं चीरी चचार च महत्तपः ॥ ३६ ॥
मातङ्गमकरक्रूरदन्तोल्लिखितवक्षसा ।
तेन व्रतयताहारं तपस्तप्तमुदन्वति ॥ ३७ ॥
तत्तपस्तोषितस्तस्मै चतुराय चतुर्मुखः
वरं वीराय विश्वेशः प्रादाज्जेतुं जगद्भयम् ॥ ३८ ॥

---

32 C D सार्चिर्जिह्वातडिज्जालबद्धा for साग्निजिह्वातडिज्जालनद्धा. B C. फणावलि for फणावली Fr मेघराजीव for घनश्रेणीव

33 B प्रज्ञानां प्राञ्जलिस्तदा, D प्राज्ञानां प्राञ्जलिस्तदा for प्राज्ञ प्राञ्जलिरव्ययम् We with A C Fr supported by the Cal edi

34 C has -विज्ञातमेव सर्वज्ञ त्वयेदं पुनरुच्यते for the first line and agreeing with the Sinhalese edition. C प्रेष्याणां, D Fr दासानां for भृत्यानां D ईश्वरे for स्वामिनि.

35. C D. Fr अग्रणीर्मानिनामस्ति पुलस्तिसुतसंभव for मानिनामग्रणीरस्ति पुलस्त्यसुतसंभव These Mss agree with the Sinhalese edition.

36 D reads चचार सुचिरं चीरी निर्विकारो महत्तप । महौजा स जगन्नाथ-फलाय फलसाधक for our text. Agreeing with the Sinhalese edition. C चकार for चचार Fr. निर्विकार सुचिर चिरी चकार महत्तप for निर्विकारश्चिरं चीरी चचार च महत्तप Fr. breaks the metre

37. B °दंष्ट्रोत्कीर्णेन वक्षसा, C. °दंष्ट्रोल्लिखितवक्षसा for °दन्तोल्लिखितवक्षसा. D. Fr अपांपतौ for उदन्वति

38 D. तत्तपोहर्षितस्तस्मै for तत्तपस्तोषितस्तस्मै B. C. जेतुं जगद्भयं प्रादाद्वरं वीराय विश्वग for वीरं वीराय विश्वेश· प्रादाज्जेतुं जगद्भयम् [C. वीरस्य for वीराय]

स कदाचिद्रटन्नागं नगं नाकौकसामरिः
हारगौरं हरस्थानं पटुनादं व्यपाटयत् ॥ ३९ ॥
स्फरन्नगशिरस्त्यक्तैरुन्नदन्नदनिर्झरैः ।
स्पृष्टे पूषणि झंकारं घोरमातन्वति क्षणात् ॥ ४० ॥
वाजिनः प्रग्रहाकृष्टखलीनावक्रकन्धरान् ।
एकतो जवयत्यद्रिपातभीत्यार्कसारथौ ॥ ४१ ॥
घूर्णमानमहाशैलतटभ्रष्टे मुहुर्मुहुः ।
मत्तस्येवोत्तरीये स्वस्थानं त्यजति निर्झरे ॥ ४२ ॥
गौरीभयपरिष्वङ्गस्पर्शलब्धमहोत्सवे ।
संक्रुद्धधूर्जटिक्रोधप्रतिलोमप्रवर्तिनि ॥ ४३ ॥
कपालनयनच्छिद्रं जटाबद्धफणावति ।
संकोचितफणाचक्रं विशत्युत्त्रासविह्वले ॥ ४४ ॥
परित्रस्ते गोपयति कृकवाकुध्वजे सति ।
कार्तस्वरमयं मेषं मातुरुत्सङ्गसङ्गिनि ॥ ४५ ॥
उत्पश्यति चिरं धीरं क्रोधरोधार्त्तचेतसि ।
भर्तुर्भ्रूभागभङ्गस्य प्रादुर्भावं ककुब्भनि ॥ ४६ ॥

---

39. D. कदाचिद्रवन्नागं for कदाचिद्रटन्नागं. D.Fr. स्वर्गौकसा for नाकौकसां. Corrected to स्वर्गौकसां in the margin of Fr

40 D Fr भास्वति for पूषणि Corrected to भास्वति in the margin of D.

41 C अर्वत for वाजिनः D Fr. एकतस्त्वरयत्यद्रि° for एकतो जवयत्यद्रि°

42 C मत्तस्येवोत्तरीये च स्थानं, D Fr. मत्तस्येवोत्तरीयं च स्थानं for मत्तस्येवोत्तरीये स्वस्थानं.

43. C उमाभयपरिष्वंगस्पर्शप्राप्त°, D दुर्गाभयपरिरंभस्पर्शप्राप्त° for गौरीभयपरिष्वंगस्पर्शलब्ध°. D. संक्रुद्धधूर्जटिकोप° for संक्रुद्धधूर्जटिक्रोध°.

44. C. D कपाललोचनच्छिद्रं for कपालनयनच्छिद्रं.

45. C उत्संगसंगिनि. D. Fr उत्संगवर्तिनि for उत्संगसंगिनि Corrected to उत्संगशायिनि in the margin of D.

46 C. ककुब्भिनि, D. Fr. ककुभति for ककुब्भनि

रूढमूलमिव श्वेतैरधोलग्नैर्भुजङ्गमैः ।
प्रौढपुष्पमिवाग्रस्थस्फुरन्नक्षत्रमण्डलैः ॥ ४७ ॥
चरणेन रणत्सिंहकुलाकुलगुहामुखं ।
गिरिं गौरीपतिः कुञ्जगुञ्जत्सिन्धुं न्यपीडयत् ॥ ४८ ॥
धराधरभराक्रान्ते बाहौ बहुभिराननैः ।
दिक्षु दीर्घप्रतिक्रोशो रावणेन कृतो रवः ॥ ४९ ॥
तं देवं स शिरश्छेदव्रणचक्रैरपूजयत् ।
नीलकुट्टिमविन्यस्तैर्मण्डलैरिव कौङ्कुमैः ॥ ५० ॥
आज्ञापयितुमेतस्य राक्षसस्य दिशो दश ।
वक्त्राणि पंक्तिसंख्यानि पुनः सृष्टानि शूलिना ॥ ५१ ॥
तमःस्थानं तमासाद्य बालिशं कुलिशं रणे ।
अजहादज धाम स्वं वैकुण्ठस्य विकुण्ठितम् ॥ ५२ ॥
तमद्योप्यनवद्येन वसुना वासवः स्वयम् ।
अजय्यं पूजयत्येकवीरं वैरस्य शान्तये ॥ ५३ ॥

---

47. C. शुभ्रै, D. शुक्लै for श्वेतै B अधोलंबै for अधोलग्नै Corrected to अधोलम्बै in the margin of B.

48. C. रणत्सिंहकुलाकुलदरीमुखं, D. Fr. रटत्सिंहकुलाकुलदरीमुखं for रणत्सिंहकुलाकुलगुहामुखं B. C कुञ्जगुंजत्स्रोतं for कुञ्जगुंजत्सिन्धुं. D. Fr व्यपीडयत् for न्यपीडयत्

49. D Fr. भुजे भूरिभिराननै for बाहौ बहुभिराननै

50. B देवं तं स for तं देवं स. D. Fr. °चक्राण्ययाजयत् for चक्रैरपूजयत् C शामकुट्टिमविन्यस्तै, D. कृष्णकुट्टिमविक्षिप्तै for नीलकुट्टिमविन्यस्तै.

51. B दानवस्य, C. दैतेयस्य, D. दनुजस्य, Fr रावणस्य for राक्षसस्य We with A. supported by the Calcutta as well as the Sinhalese editions C भूय सृतानि, D भूय सृष्टानि, Fr पुन सृतानि for पुन सृष्टानि

52 D Fr have the following for our text —स्वं यामाजय्यमजह-[हा]द्वैकुण्डस्य विकुण्ठितम् । तमासाद्य तम स्थानं बालिशं कुलिशं रणे Agreeing with K Dharmārāma and H. Sumangala.

53. D अजेयं, Fr दुर्जयं for अजय्यं.

बलिं वज्राय पौलोमी सस्मितं विगताद्रा ।
कुर्वती कुरुते शक्रं व्रीडासन्नमिताननम् ॥ ५४ ॥
यक्षनाथो दिशंस्तस्मै केवलं धनदो धनम् ।
सर्वस्वहरणप्रीतो रावणस्तु धनेश्वरः ॥ ५५ ॥
धर्म्यं कर्म परित्यज्य प्रीणाति पिशितप्रियम् ।
प्रेतराजोऽप्यभिप्रेतभक्ष्यदानेन दानवम् ॥ ५६ ॥
दूरतः सेवते भानुरादित्यमणितोरणात् ।
च्युते तन्मन्दिरद्वारदाहभीतो हुताशने ॥ ५७ ॥
निवृत्ततत्सरःपद्मस्वापकारणतेजसा ।
बोधनीयं किलाशेषमिन्दुना कौमुदं वनम् ॥ ५८ ॥
यथा न कज्जलस्पर्शचित्रवैवर्ण्यसंभवः ।
तथा ज्वलितुमादिष्टो दीपकृत्यो वृषाकपिः ॥ ५९ ॥
लब्धसेवावकाशः सन् सेवते तं समीरणः ।
रतिक्लमथुमद्देहं तरङ्गान्तरगोचरः ॥ ६० ॥
पातालहृदयान्तःस्थं पद्मरागं पयोनिधिः ।
अग्रमांसमिवोद्धृत्य ददाति पिशिताशिने ॥ ६१ ॥

---

54. B. C पौलोन्नी for पौलोमी

55. D. Fr यक्षराज for यक्षनाथ C सर्वस्वंहरणात्प्रीत for सर्वस्वहरणप्रीत D. F1 रावणो द्रविणेश्वर for रावणस्तु धनेश्वर

56 C. कम धर्म्य परित्यज्य for धर्म्यं कर्म परित्यज्य. D. F1. प्रेतनाथ for प्रेतराज C. राक्षसं for दानवं

57 D. F1 विभावसौ for हुताशने Corrected to विभावसौ in the margin of D.

58. F1. बाधनीयं for बोधनीयं. C विधुना, D F1 अब्जेन for इन्दुना.

59. B. न यथा धूमस्पर्शेन, C न यथा धूमिकास्पर्श for यथा न कज्जलस्पर्श D. विभावसु, F1 हुताशन for वृषाकपि

60. D. प्राप्तसेवा° for लब्धसेवा° D F1. रतिक्लमथमद्देहं for रतिक्लमथुमद्देहं

61. D. Fr. पुष्परागं for पद्मरागं C. अपांपति for पयोनिधि. C. अग्र्यमांसमिवादाय for अग्रमांसमिवोद्धृत्य. C. दितिनन्दिने for पिशिताशिने.

काले कालाभ्रगर्भेऽपि निर्मदा नर्मदादयः ।
नन्दयन्ति सदा नद्यो वज्रैर्वज्रायुधद्विषम् ॥ ६२ ॥

प्रियाजनपरिष्वङ्गप्रीतिं कर्तुं निरंतराम् ।
निशि ज्ञातमनोवृत्तिस्तमुपैति हिमागमः ॥ ६३ ॥

तस्योद्यानवनं विश्वं दिवः प्रवसता सता ।
सर्वर्तुषु निजैः पुष्पैर्भूष्यते मधुनाऽधुना ॥ ६४ ॥

दुराराध्यस्वभावस्य समालम्ब्य सिषेविषाम्
जलक्रीडादिनं तस्य ग्रीष्मश्चिरमुदीक्षते ॥ ६५ ॥

त्रासकण्ठग्रहव्यग्रांस्तस्मिन्निच्छति मानिनः ।
धीरं गर्जन्ति लङ्कायामकाले वारिदा अपि ॥ ६६ ॥

अश्रान्ता वीजयत्यष्टहस्तपर्यायसंपदा ।
इति चण्डीमभिप्रेप्सुः कर्तुं चामरधारिणीम् ॥ ६७ ॥

स्तब्धकर्णो नमत्येनं श्रवणाक्षोभमारुतैः ।
भूभक्तिकुसुमक्षेपदोषभीतो गणाधिपः ॥ ६८ ॥

---

62 D नर्मदाद्याश्च निर्मदा for निर्मदा नर्मदादय.

63. D. Fr निरंतरम् for निरंतराम्

64. D यत्प्रवस्तायता दिव for दिव प्रवसता सता The reading of D. appears to us incorrect and corrupt. D निजै सूनैर्भूष्यते, Fr. निजै शनैर्भूष्यते for निजै पुष्पैर्भूष्यते

65 B has the following for our text -दुराराध्यस्वभावस्य ग्रीष्मस्तस्य सिषेविषाम् । समालम्ब्य जलक्रीडादिनं चिरमुदीक्षते. Agreeing with the Sinhalese edition. C. जलकेलीदिनं, D. Fr अंबुकेलिदिनं for जलक्रीडादिनं. Corrected to अंबुकेलिदिनं in the margin of D.

66 D Fr. स्थिरं for धीरं Corrected to स्थिरं in the margin of D. D. Fr तोयदा for वारिद.

67. C अश्रान्तं, D. Fr सततं for अश्रान्ता. Corrected to सततं in the margin of Fr. D °वाहिनीम् for °वारिणीम्.

68 D Fr. स्थिरकर्ण for स्तब्धकर्ण. C. D. श्रवणाक्षेप°, Fr. श्रवणक्षोभ°. for श्रवणाक्षोभ C. °कुसुमाक्षेप° for °कुसुमक्षेप°. B. Fr. गजानन for गणाधिप.

स्मरश्च संसदं तस्य विशति स्रस्तवाससा ।
प्रतीहार्या स्मिताकूतविभ्रमैः कथितागमः ॥ ६९ ॥
शुद्धान्तमन्ततः शुद्धः स्त्रीजनस्य तदाज्ञया ।
लीलोपदेशदानैकव्यग्रो विशति मन्मथः ॥ ७० ॥
त्वयि रक्षाकृति स्वर्गसङ्गनामपि दैवते ।
कथं नक्तंचरेणैवं दिवस्त्रासो वितन्यते ॥ ७१ ॥
भ्रातरि द्विषतो बाहुभर्त्रौजासि विडौजसि ।
भोगिभोगे चिरं तावत्केयं देवस्य शायिका ॥ ७२ ॥
आत्मस्वनुगुणं दैवं दृष्ट्या मन्यामहे तव ।
न हि त्वं दैवहीनस्य जनस्य तु सुदर्शनः ॥ ७३ ॥
इत्थं वाचस्पतौ वाचं व्याहृत्य विरते क्षणम् ।
स्वर्गे च स्वप्रतिजल्पस्पृहानिःस्पन्दवर्तिनि ॥ ७४ ॥

69 B प्रतिहार्या for प्रतीहार्या C स्मितव्यक्त°, D स्मितादिष्ट°, Fr स्मितोद्दिष्ट° for स्मिताकूत°

70. D शुद्धान्तमन्त शुद्ध सन्, Fr शुद्धान्तमन्यत शुद्ध for शुद्धान्तमन्तत शुद्ध . D agrees with the Calcutta edition.

71. A. C देवते for दैवते C रात्रिंचरेणैवं for नक्तंचरेणैवं D. Fr वितायते for वितन्यते We prefer देवते for दैवते

72 B. C सुखा for चिरं Corrected to सुखा in the margin of C

73 B. reads the following for our text —दैवं मन्यामहे दृष्ट्या तवानुगुणमात्मसु । जनस्य दैवहीनस्य न हि त्वं सुखदर्शन Agreeing with the Sinhalese edition C. लोकस्य सुखदर्शन . Fr. जनस्य सुखदर्शन for जनस्य तु सुदर्शनः. Corrected to सुखदर्शन in the margin of Fr.

74. B. C एवं वाचस्पतौ वाचं संवृण्य विरते क्षणं for इत्थं वाचस्पतौ वाचं व्याहृत्य विरते क्षणम् Cerrected to संवृण्य in the margins of B C. [C क्षणात् for क्षणं].

कुक्षिस्थनिःशेषलोकत्रयभोरोद्वहोऽप्यहम् ।
विधाय मानुषीकुक्षौ वासं शोकक्षयाय वः ॥ ७५ ॥
भत्वा राम इति ख्यातः कर्यां भर्तुः सुरद्विषाम् ।
एकबाणकृताशेषशिरश्छेदपराभवम् ॥ ७६ ॥
इत्युदारमुदाहृत्य वचो वाचामगोचरः ।
तत्याज वेदविद्वेद्यो वर्षातल्पं वृषानुजः ॥ ७७ ॥
चिरशयनगुरुं स्वभोगभारं
भुजगपतिः शनकैर्वितत्य खेदात् ।
शिथिलितफणपंक्तिमुक्तदीर्घ-
श्वसितविधूतमहार्णवोऽवतस्थे ॥ ७८ ॥
भूमिस्पर्शभयादुपेत्य तरसा लक्ष्म्या करेणोद्धृतं
व्यालम्बैकपटान्तमंसशिखरे क्षिप्त्वोत्तरीयं ततः ।
निद्रामन्थरताम्रलोचनयुगो लीलालसन्यासया
गत्या निर्जितवारणेन्द्रगमनः क्वापि प्रतस्थे हरिः ॥ ७९ ॥

इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य
कृतौ जगत्पत्यभिगमनो नाम द्वितीयः सर्गः ।

---

75 C. reads the following for the first line of our text — अपि कुक्षिस्थनि शेषलोकत्रयभरोद्वह . Agreeing with the Sinhalese edition. D. Fr प्रपद्य for विधाय D Fr. मर्त्यस्त्रीकुक्षिवासं for मानुषीकुक्षौ वासं. C. मन्युक्षयाय for शोकक्षयाय

76. B C. दाशरथिर्ज्येष्ठ for राम इति ख्यात . D. has the following for the first line —कुर्या राम इति ख्यातो भूत्वा भर्तु सुरद्विषाम् Agreeing with the Sinhalese edition. C. शीर्षच्छेदपराजयम् for शिरश्छेदपराभवम्.

77. C उदीर्यासौ for उदाहृत्य D Fr. मुमोच for तत्याज.

78. D. Fr उरगपति for भुजगपति . D Fr ग्लाने for खेदात्.

79 B नीरस्पर्श°, C वारिस्पर्श° for भूमिस्पर्श°. B सहसा for तरसा D. देव्या, for लक्ष्म्या C अंशशिखरे, D. अंगशिखरे for अंसशिखरे D. Fr. रक्तलोचनयुग for ताम्रलोचनयुग . D प्रभु for हरि .

तृतीयः सर्गः ।

अथ श्रियः प्राणसमस्य तस्य
ज्ञात्वा विविक्षामिव मर्त्यधाम ।
पूर्वावतीर्णः सुमनःसमृध्या
सम्यग्वसन्तो भुवनं ततान ॥ १ ॥

भ्रान्त्वा विवस्वानथ दक्षिणाशा-
मालम्ब्य सर्वत्र करप्रसारी ।
ऋत्विक् ततो निःस्व इव प्रतस्थे
वसूपलब्ध्यै धनदस्य वासम् ॥ २ ॥

दृक्षा मनोज्ञद्युति चम्पकाख्या
रूपं वितेनुर्नवकुड्मलाढ्याः ।
न्यस्ता वसन्तस्य वनस्थलीभिः
सहस्रदीपा इव दीपवृक्षाः ॥ ३ ॥

सम्पिण्डितात्मावयवा उदीयुः
पद्मा नवाः कण्टकितोर्ध्वदण्डाः ।
अन्तर्जलावासविरूढशीत-
त्रस्ता वसन्तातपकाम्ययेव ॥ ४ ॥

---

1. A reads the following for our text —अथो वसन्त सुमनः समृद्धा पूर्वावतीर्णा भुवनं ततान । तस्य श्रिय प्राणसमस्य सम्यग् ज्ञात्वा विविक्षामिव मर्त्यधाम Agreeing with the Sinhalese edition D. Fr. अथो for अथ C. मत्वा for ज्ञात्वा. D Fr मर्त्यसद्म for मर्त्यधाम Fr पूर्वावरूढ for पूर्वावतीर्ण

2. C क्रान्त्वा, D. क्रन्त्वा for भ्रान्त्वा D Fr. यत्रोपलब्ध्य for वसूप लब्ध्यै D. Fr. वासः for वासं. D Fr. agree with the सुभाषितावली.

3. B reads the first two lines thus:-रूपं वितेनुर्नवकुड्मलाढ्या दृक्षा मनोज्ञद्युति चम्पकाख्या . Agreeing with the Sinhalese edition C दृमाः for दृक्षा D चम्पकाख्यरूपं, Fr चम्पकाक्षरूपं for चम्पकाख्यारूपं D Fr. °कुड्मलाढ्या for °कुड्मलाढ्या

4. D. Fr. °विरूढशैत्यक्लिष्टा for °विरूढशीतत्रस्ता . Corrected to this in the margin of Fr.

कर्णे कृतो दीर्घविलोचनाना-
मालोलदृष्टिद्युतिभिन्नरागः ।
बालोऽप्यशोकप्रभवः प्रवालः
कान्तिं प्रपेदे परिणामगम्याम् ॥ ५ ॥

प्रादुर्बभूवुर्नवकुड्मलानि
स्फुरन्ति कान्त्या करवीरजानि ।
प्रवासिनां शोणितपाटलानि
तीरीफलानीव मनोभवस्य ॥ ६ ॥

वन्ध्योऽपि सालक्तकपादघातं
लब्ध्वा रणन्नूपुरमङ्गनानाम् ।
उद्भूतरोमांच इवातिहर्षात्
पुष्पांकुरैरास नवैरशोकः ॥ ७ ॥

महीध्रमूर्ध्नि भ्रमरेन्द्रनीलै-
र्विभक्तशोभः शिखिकण्ठनीलैः ।
गृहीतभास्वन्मुकुटानुकार-
स्ततान कान्तिं नवकर्णिकारः ॥ ८ ॥

---

5. B. वृत. for कृत C. ह्रायतलोचनानां for दीर्घविलोचनानां D. वाल for बाल . D. Fr. प्रबाल. for प्रवालः. C. प्रभां, D. Fr. दीप्ति for कान्तिं D. Fr °रम्याम् for °गम्याम्

6. D. Fr. आविर्बभूवुर्नवकुड्मलानि for प्रादुर्बभूवुर्नवकुड्मलानि. D Fr. मनोभुवस्य for मनोभवस्य.

7. D बन्ध्योऽपि for वन्ध्योऽपि. D. Fr रटन्नूपुरं for रणन्नूपुरं. D. Fr. इव प्रहर्षात् for इवातिहर्षात्

8 D Fr. °काले [लै] for °नीलै . D. Fr दीप्तिं for कान्तिं. Fr. °कर्णिकोरः for °कर्णिकार .

वासन्तिकस्यांशुचयेन भानो-
र्हेमन्तमालोक्य हतप्रभावम् ।
सरोरुहामुद्धृतकंटकेन
प्रीत्येव रम्यं जहसे वनेन ॥ ९ ॥

समीरणानर्तितमंजरीके
चूते निसर्गेण निषक्तभावाः ।
पुष्पावतंसेषु पदं न चक्रु-
र्दीप्तेष्विवाशोकवनेषु भृंगाः ॥ १० ॥

विनिद्रपुष्पाभरणः पलाशः
समुल्लसत्कुन्दलतावनद्धः ।
उद्धूतभस्मा मधुनेव रेजे
राशीकृतो मन्मथदाहवह्निः ॥ ११ ॥

वसन्तदीप्तातपखेदितानां
महीरुहां वातचलाः प्रवालाः ।
जिह्वा यथा विद्रुमभङ्गताम्रा
निष्कासिता रेजुरतिश्रमेण ॥ १२ ॥

---

9 D. Fr अंशुगणेन for अंशुचयेन. Corrected to अंशुगणेन in the margin of D. रम्यं जहासे घृतकण्टकेन प्रीत्या वनेनेव सरोरुहाणाम्, Fr वनेन प्रीत्या प्रचुर जहासे for प्रीत्येव रम्यं जहसे वनेन. D agrees with the Sinhalese edition. these readings appear to us ungrammatical and incorrect.

10 D प्रभजनानर्तित° for समीरणानर्तित°. Corrected प्रभंजनानर्तित° in the margin of Fr. But the original reading is distinctly clear.

11 C विभिन्न°, D प्रफुल्ल°, Fr. प्रफुल्त° for विनिद्र°. D. Fr. °लतानिबद्धः for °लतावनद्ध . D Fr. पुंजीकृत for राशीकृत .

12. D. वायुचला for वातचला D. प्रबाला for प्रवाला .

प्रालेयकालप्रियविप्रयोग-
ग्लानेव रात्रिः क्षयमाससाद ।
जगाम मन्दं दिवसो वसन्त-
क्रूरातपश्रान्त इव क्रमेण ॥ १३ ॥

ततः स्मरस्याहवधामकल्पं
क्षोणीपतिर्भ्रान्तशिलीमुखाङ्कम् ।
उद्यानमासेवत रक्तदीप्ति-
संतानभास्वत्करवीरकीर्णम् ॥ १४ ॥

रम्याणि रामानुगतो विहङ्ग-
पक्षानिलानर्तितपल्लवानि ।
उद्भ्रान्तभृङ्गाणि लतागृहाणि
संभावयामास रहोविहारैः ॥ १५ ॥

त्वमप्रमादं कुरु नूपुरांघ्रौ
भर क्षणं कांचि नितम्बभारम् ।
इतीव तस्मिन्विहरन्नृपस्त्री-
कक्ष्यातुलाकोटिपुटैर्निनेदे ॥ १६ ॥

13　C °म्लानेव, D Fr. °ग्लानश्च for °ग्लानेव D Fr नक्तं for रात्रि Fr. इयाय for जगाम D. °क्रान्त for °श्रान्त.

14　C. °सद्मकल्पं, D. °भूम [मि]-कल्पं for °धामकल्पं.

15. C. बालानुगत, D रामानुसृत. for रामानुगत. C पतंगपत्रानिलाकम्पितपल्लवानि, D शकुन्तपक्षानिलाकम्पितपल्लवानि, Fr पतंगपत्रानिलानर्तितपल्लवानि for विहंगपक्षानिलानर्तितपल्लवानि. D. संमानयामास, Fr संपूजयामास for संभावयामास.

16. D. Fr. नन्वप्रमादं for त्वमप्रमादं C. भरस्व त्वं कांचि, D. वरस्व त्वं कांचि for भर क्षणं कांचि. D नृपस्त्रीकक्षा° for नृपस्त्रीकक्ष्या°

चिक्षेप बाला मुहुरर्धदृष्टिं
पत्यावनङ्गक्षतधैर्यवृत्तिः ।
दूरस्थपुष्पस्तबकावभङ्ग-
व्याजेन संदर्शितबाहुमूला ॥ १७ ॥

पत्या परस्या नु विधीयमाने
विलासवत्याश्चरणान्तरागे ।
अन्यत्र युक्तोऽपि ववन्ध रागं
लाक्षारसस्तत्प्रतिपक्षनेत्रे ॥ १८ ॥

पातुं सुदत्या वदनारविन्द-
मादाय दृष्टो ललनाभिरीशः ।
अपुष्परेणुव्यथितेऽपि तस्या-
श्चिक्षेप नेत्रे मुखगन्धवाहम् ॥ १९ ॥

पुष्पावभङ्गे निजहस्तकान्त्या
विन्यस्तरागं कठिनं पलाशं ।
प्रवालकृत्ये विनियोजयन्ती
भर्त्रा परा सस्मितमालिलिङ्गे ॥ २० ॥

---

17. C. ददौ हि बाला सुहुरर्धचक्षु , D ददौ हि रामा सुदुरर्धदृष्टिं, Fr. चिक्षेप बाला सुहुरर्धचक्षु for चिक्षेप बाला सुहुर्धदृष्टिं B भर्तर्यनंगक्षित°, Fr. पतावनंगक्षित° for पत्यावनंगक्षत° D स्तवकावभंग° for स्तबकावभंग°.

18 B. परस्या प्रविधीयमाने, C परस्याश्च, D परस्यास्तु, Fr परस्या हि for परस्या नु Corrected परस्या हि in the margin of Fr. B. agreeing with the Sinhalese edition.

19 C सुतन्व्या , D सुमुख्याः for सुदत्या . D Fr प्रमदाभि for ललनाभि . C °गन्धवातम् for °गन्धवाहम्.

20 Fr. प्रवालकृत्ये for प्रवालकृत्ये. D राज्ञा for भर्त्रा. C सम्पृहं for सस्मितं Corrected to सस्पृहं in the margin of C. The original reading is blotted with yellow fluid.

स्निग्धद्विजालीरुचिरं प्रियङ्गु-
श्यामद्युतिश्चारुतमालकान्ता ।
बिभर्षि गन्धाहृतभृङ्गचक्रं
सन्माधवीमण्डपमेतदार्यम् ॥ २१ ॥

मध्येललाटं तिलकस्य वृत्ति-
रोष्ठद्युतिर्भाति च पाटलेयम् ।
पुन्नागसंयोगविभूषितायाः
श्वेतश्च ते यातमशोकभावम् ॥ २२ ॥

किं कौतुकेन श्रमकारिणा ते
सृज त्वमुद्यानविहाररागम् ।
बाले त्वमस्योपवनस्य लक्ष्मी-
रित्येवमूचे ललना सखीभिः ॥ २३ ॥

प्रियेण कर्णे विनिवेशितस्य
तन्व्या नवाशोकदलस्य रागः ।
आनीलया नेत्ररुचा निरस्त-
स्तस्या जगामेव विपक्षचक्षुः ॥ २४ ॥

---

21. D Fr °सुभगं for °रुचिरं C °भृंगवृन्दम् for °भृगचक्रम्

22. C मध्येकपोलं for मध्येललाटं D Fr चेत समायातमशोकतान्ते for चेनश्च ते यातमशोकभावम् D. Fr. agree with the Sinhalese edition

23 C. सुञ्चस्व तूद्यानविहाररागं, D त्यजत्वमुद्यानविलासरागं, Fr. सृजस्व तूद्यानविहाररागं for सृजत्वमुद्यानविहारराग. C तन्वि for बाले D प्रमदा for ललना

24 B reads the first two lines thus·-प्रियेण तन्व्या विनिवेशितस्य कर्णे नवाशोकदलस्य राग . Agreeing with the Sinhalese edition C कान्तेन कर्णे विनिवेशितस्य, D प्रियेण श्रोत्रे विनिवेशितस्य for प्रियेण कर्णे विनिवेशितस्य. The reading of D. is Corrupt. D. दृष्टिरुचा for नेत्ररुचा.

हारिप्रलापोऽथ निधिर्गुणानां
निधाय चक्षुर्मदमन्दपातम् ।
पर्यन्तभूमौ निकटोपयाता-
मुवाच वाचं प्रतिहाररक्षीम् ॥ २५ ॥

कुर्वन्ति लोभेन विलोकयन्त्यः
कुरङ्गनेत्रा विलसत्प्रसूनम् ।
शुभाभिरेनं नयनप्रभाभिः
शारत्विषं पुष्पतरुं तरुण्यः ॥ २६ ॥

विभाति भृङ्गीसरणी सरन्ती
गन्धाहृता चम्पककुड्मलाग्रे ।
अन्तं प्रदीपस्य निषेवमाणा
धूमावली कज्जलरेखिणीव ॥ २७ ॥

विलोकयाक्ष्णोः शितिकान्तिजालै-
रुदन्यया वारिविगाहितायाः ।
रक्तोत्पलं तन्निकटप्ररूढ-
मिन्दीवरत्वं गमितं हरिण्याः ॥ २८ ॥

25. C. हारिप्रवादोऽथ for हारिप्रलापोऽथ D. आधाय, Fr निक्षिप्य for निधाय C. नेत्रं, D नेत्रे for चक्षु D मदमन्दपाते for मदमन्दपातम्. D प्रतिहार-रक्षां for प्रतिहाररक्षीं.

26. B शुभाभिरेनं नयनप्रभाभिर्विलोकयन्त्यो विलसत्प्रसूनम्। कुर्वन्ति लोभेन कुरङ्गनेत्रा, C. कुरंगनेत्रा विलसत्प्रसूनम् । कुर्वन्ति लोभेन विलोकयन्त्यः for कुर्वन्ति लोभेन विलोकयन्त्य । कुरंगनेत्रा विलसत्प्रसूनम्. C. पुण्याभि, Fr शिवाभि for शुभाभि . D. Fr. युवत्य for तरुण्य. B. agrees with the Sinhalese edition.

27. D Fr. °कुड्मलाग्रे for °कुड्मलाग्रे D. Fr. धूमावलि for धूमावली. C. कज्जललेखिनीव for कज्जलरेखिणीव.

28. D Fr °कान्तिपुञ्जै for °कान्तिजालै . Fr. पिपासया for उदन्यया. C. नीर°, Fr. तोय° for वारि°. Corrected to तोय° in the margin of Fr.

संच्छादिते पद्मरजोवितानैः
परिभ्रमन्वारिणि राजहंसः ।
स्ववर्त्मरेखाभिरसौ विभज्य
प्रयच्छतीवाञ्जवनं खगेभ्यः ॥ २९ ॥

इयत्प्रमाणोऽपि सरप्रदेश-
स्तव प्रसादेन ममास्तु भोग्यः ।
इत्येष संदर्शयतीव मद्गु-
र्हंसाय शोषाय विसारितांसः ॥ ३० ॥

पद्मः सितोऽयं पवनावधूतै-
र्निर्धौतरागो नु तरङ्गलेशैः ।
संभावितो नु द्रुहिणेन तावत्
कृतादिकर्मापि न यावकेन ॥ ३१ ॥

ततः सलीलं सलिलं विभिन्द-
न्नेवं वदन्नेव वराङ्गनाभिः ।
वृतो वृषेन्द्रोपमखेलगामी
स दीर्घिकां दीर्घभुजो जगाहे ॥ ३२ ॥

---

29 D. प्रच्छादिते, Fr. आच्छादिते for संछादिते D पद्मरज पिधानै for पद्मरजोवितानै . C D परिक्रमन् for परिभ्रमन् A. B स्वमार्गलेखाभि for स्ववर्त्मरेखाभि . C. D द्विजेभ्य for खगेभ्यः.

30 D. प्रसारितांश, Fr. प्रसारितांस for विसारितांस Corrected to प्रसारितांस in the margin of Fr

31. D सितोऽथ पद्म· पवनावधूतै for पद्मः सितोऽयं पवनावधूतै C निर्णिक्तरंगो नु तरंगलेशैः, D निर्णिक्तरागो नु तरंगलेशै for निधातरागो नु तरंगलेशै . D. संमानितो नु द्रुहणेन तावत् for संभावितो नु द्रुहिणेन तावत्

32. C. तदा for तत . C. Fr. विभंजन् for विभिन्दन्.

तस्योरसि क्षत्रकुलैककेतो-
स्तरङ्गदोषा कमलाकरेण ।
न्यस्ता मुहुः पङ्कजरेणुपंक्तिः
सौवर्णसूत्रश्रियमाततान ॥ ३३ ॥

पद्माकरो वारि विगाहमानं
कामीव रामाजनमूरुदघ्नम् ।
वीचीकराग्रेण नितम्बभागे
व्यास्फालयामास शनैः सशब्दम् ॥ ३४ ॥

तस्यावगाहे वनिताजनस्य
दूरीकृतः पीननितम्बचक्रैः ।
लब्धप्रवेशस्तनुषूदरेषु
स्तनैरुदासेऽथ सरस्तरङ्गः ॥ ३५ ॥

क्रीडापरिक्षोभरयेण तासा-
मुत्सारिते पङ्कजरेणुजाले ।
कुसुम्भरक्तादिव कञ्चुकात्तत् ।
कृष्टं बभासेऽम्बुरुहाकराम्भः ॥ ३६ ॥

33. D क्षात्र° for क्षत्र°. D. Fr. °पांसुपक्ति for °रेणुपंक्ति . D. हैरण्य° for सौवर्ण°.

34. C वामाजनं, D. बालाजनं, Fr योषाजनं for रामाजनं D. भंगीशयाग्रेण for वीचीकराग्रेण C. नितम्बदेशे for नितंबभागे

35. C ललना°, D महिला°, Fr रमणी° for वनिता°. D. Fr. प्रोत्सारित. for दूरीकृत C °विम्बै, D. °वारै, Fr. °दृन्दै· for °चक्रै .

36. C केली°, D खेला° for क्रीडा° D Fr दूरीकृते for उत्सारिते D. °पाशुपाशे, Fr. °पासुजाले for °रेणुजाले. B कुपुंभरक्तात, C. कुपुभशोणात्, D. कौर्ष-भताभ्रात्, Fr. कुसुंभताभ्रात् for कुसुंभरक्तात्

रामाभिरुत्कण्टकदण्डमग्रे
संभावितं न च्छिदया सरोजम्
इन्दीवराणामुदहारि पंक्ति-
र्दीक्षा मृदुष्वेव जनस्य शक्तिः ॥ ३७ ॥

बालापरिष्वंगसुखाय पत्यु-
रन्तर्जलावारितमूर्ति यातुः
विघ्नाय वैमल्यमपां बभूव
व्यर्थः प्रसादो हि जलाशयानाम् ॥ ३८ ॥

भृंगा निलीनेन सरोजखण्डे
योषिद्वितीयेन नराधिपेन
उत्सारिता वक्तुमिवापरासां
कर्णान्तमीयुर्निहितावतंसम् ॥ ३९ ॥

नृपेण केलीकलहेऽपरस्या-
श्छिन्नच्युतस्याम्बुजिनीपलाशे
हारस्य वीचीकणिकाः समीपे
पूर्वास्थिताः संवरणान्यभूवन् ॥ ४० ॥

---

37 D. कान्ताभि° for रामाभिः. Fr °नालं for °दण्डं D संमानितं for संभावितं. C राजि. for पंक्ति

38 A अन्तर्जलावारितमूर्ति यातुर्बालापरिष्वगसुखाय पत्यु , B अन्तर्जलावारितमूर्तिघाता° [second line is conpletely blotted], D रामापरिष्वगसुखस्य लब्धेरन्तर्जलावारितमूर्ति यातु , Fr बालापरिष्वंगसुखस्य हेतोरन्तर्जलावारितमूर्ति यातु for the first two lines of our text. A B. agree with सूक्तिमुक्तावली. D. Fr नैर्मल्य for वैमल्य A व्यर्थ. प्रयासो हि जलाशयानां, B वृथा प्रयासो हि जडाशयानां, D मुधा प्रसादो हि जडाशयानां for व्यर्थ प्रसादो हि जलाशयानां. A. agrees with the सूक्तिमुक्तावली.

39 B C सरोजषण्डे for सरोजखण्डे D योषाद्वितीयेन, Fr. कान्ताद्वितीयेन for योषिद्वितीयेन Fr जनाधिपेन for नराधिपेन. D प्रोत्सारिता for उत्सारिता .

40. C. भूपेन for नृपेण D. अंबुजिनीप्रपण for अंबुजिनीपलाशे.

क्रीडाविमर्दे वलयस्य भिन्न-
भ्रष्टस्य चिक्षेप विकृष्य खण्डम्
स्वच्छे जले बालमृणालभङ्ग-
शंकाहृतः शंखमयस्य हंसः ॥ ४१ ॥

रोधोलतामण्डपयातकान्ता-
संभोगतः सर्पति कांचिनादे
ररक्ष राजानमथ व्यलीका-
दुत्त्रासमुक्तः कलहंसनादः ॥ ४२ ॥

निरुद्धहासस्फुरिताधरोष्ठः
सद्यःसमाविष्कृतरोमहर्षः ।
जलावमग्नप्रमदोपगूढे-
रुद्भासकस्तस्य बभूव गण्डः ॥ ४३ ॥

फुल्लं यदीदं कमलं किमेव-
मत्रैव नीलोत्पलयोर्विकाशः
इत्याक्षशंको वदनं सुदत्या
हंसः सिषेवे न सरस्तरन्त्याः ॥ ४४ ॥

---

41. B लीलाप्रमाथे, C लीलाविमर्दे, D केलीविमर्दे for क्रीडाविमर्दे. D. वलयस्य for वलयस्य D अच्छे जले, Fr अच्छोदके for स्वच्छे जले.

42. A. B रोधोलताकुञ्जनेतबालासंभोगत for रोधोलतामण्डपयातकान्तासभोगत C. D इति for अथ

43. D सरुद्ध° for निरुद्ध° D °स्फुरिताधरौष्ठ for स्फुरिताधरोष्ठ C. °लोमहर्ष for °रोमहर्ष F1 नीरावमग्न° for जलावमग्न° D F1 गल्ल for गण्ड.

44. C नलिनं for कमल D विकास. for विकाश. F1 लपन for वदनं. Corrected to लपनं in the margin of F1, D. सुमुख्या for सुदत्या.

सुगन्धिनिश्वासगुणावकृष्टं
मुखे पतन्तं करपल्लवेन ।
दुर्वारमन्तःसलिलप्रवेशात्
तत्याज काचिद्भ्रमरीसमूहम् ॥ ४५ ॥

मत्स्येन चीनांशुकपृष्ठलक्ष्य-
कांचीमणिग्रासकुतूहलेन ।
आघ्राय मुक्तोपनितम्बमेका
संत्रासभुग्नभ्रु चिरं चकम्पे ॥ ४६ ॥

तत्याज नो सव्यपदेशमन्या
व्युदस्तवात्साः सलिलं नृपेण ।
स्थानप्रयुक्तः कपटप्रयोगः
कांचिद्विपत्तेर्हि जनं भुनक्ति ॥ ४७ ॥

हृतान्तरीया हृदयेश्वरेण
व्रीडोपतप्ता पयसः प्रसादात् ।
व्यर्थप्रणामाश्रुनिपातवृत्तिः
काचिज्जलं संभ्रमयाञ्चकार ॥ ४८ ॥

---

45. C °गुणोपकृष्टं for °गुणावकृष्ट. C मुखे भ्रमन्त, D. आस्ये भ्रमन्तं, Fr. आस्ये पतन्त for मुखे पतन्तं D. मुमोच for तत्याज.

46. C. D. °दृश्य° for °लक्ष्य°. Corrected to °दृश्य° in the margin of D; C. D. चाघ्राय for आघ्राय C. reads this verse after the 44th stanza of our text.

47. C has the following for the last two lines —स्थानप्रयुक्तो हि जनं भुनक्ति क्वचिद्विपत्ते कपटप्रयोग . Agreeing with the Sinhalese edition, D. स्थाने प्रयुक्त for स्थानप्रयुक्त Fr. बिभर्ति for भुनक्ति

48 Fr. हृतोत्तरीया for हृतान्तरीया. D लज्जोपतप्ता for व्रीडोपतप्ता D Fr सभ्रमयाम्बभूव for संभ्रमयाञ्चकार Corrected to °चकार in the margin of D. The original reading though blotted by yellow colour appears to be °बभूव.

सामि प्रबुद्धस्य कुशेशयस्य
कोशे मुखन्यासनिरुद्धदृष्टिम् ।
स्पष्टुं प्रयेते कलहंसशावं
निःशब्दमुत्खण्डितवीचि काचित् ॥ ४९ ॥

संक्षोभितोद्दामसरस्तरङ्ग-
क्षिप्ता किलैका नृपतिं कुचाभ्याम् ।
आहत्य धृष्टत्वकृतापवाद-
व्यपायरम्यं मुहुरालालम्बे ॥ ५० ॥

अन्या पुराणं निजमेव वीचि-
विक्षालिताङ्गेऽधिपतेः पृथिव्याः
पदं नखस्य स्फुटकुङ्कुमाङ्कं
दृष्ट्वा परं संशयमालालम्बे ॥ ५१ ॥

किं राजहंसस्य शशाङ्कबिम्ब-
च्छायामुषश्चञ्चरियं प्रवालैः
बद्धा गन्धोज्ज्वलकेशराग्र-
च्छेदेषु दिग्धा नु सरोजकान्त्या ॥ ५२ ॥

---

49 D ईषत्प्रबुद्धस्य, Fr किञ्चित्प्रबुद्धस्य for सामि प्रबुद्धस्य. C. मुखाधान निरुद्ध° for मुखन्यासनिरुद्ध°. C D वर्तु for स्पष्टुं B स्प्रष्टुं व्यासीत्कलहंसशावम् for स्पष्टुं प्रयेते कलहंसशावम् Agreeing with the Sinhalese edition C. D. उत्खण्डितवीचिरन्या for उत्खण्डितवीचि काचित्

50. C किलैकाऽवनिपं, D. किलैकाऽर्थपतिं for किलैका नृपतिं C. agreeing with the Sinhalese edition. D. स्तनाभ्याम् for कुचाभ्याम् Fr व्याहत्य for आहत्य

51. D Fr have the following for the first three lines —नखस्य मार्गं निजमेव वीचिविक्षालितांगे स्फुटकुंकुमांकम् । पुराणमन्याऽधिपते पृथिव्या D. काचित् for अन्या C. वराया for पृथिव्या C नखानाम् for नखस्य. D. आजगाहे for आलालम्बे.

52 C मृगांक° for शशांक°. D प्रवालै for प्रवालैः. C. नद्धा for बद्धा. D. Fr. °दीप्त्या for °कान्त्या.

भृङ्गोऽयमिन्दीवरमध्यपात-
　सञ्चारितैस्तद्युतिरञ्जितो नु ।
निधाय वायं निजपक्षशोभा-
　मादत्त नु स्वादुमतः परागम् ॥ ५३ ॥
पद्मा पदं पद्मवने विभिन्न-
　वीचीकणार्द्रद्दतयावकाङ्कम् ।
चक्रे चिरं चारुतया नु लोभा-
　दित्यास कासामपि तत्र तर्कः ॥ ५४ ॥
यातो नु भृङ्गः पतितः पुरास्मिन्
　बीजत्वमेवं नु विरिञ्चिसृष्टिः ।
विपाकनीलद्युति पद्मबीजं
　कोशादुदस्येति कयाचिदूचे ॥ ५५ ॥
प्रियोऽपरस्या गलितान्तरीये
　व्यापारयामास दृशौ नितम्बे
तद्धस्तयंत्रच्युतवारिधारा
　नालं बभूवास्य मुखारविन्दे ॥ ५६ ॥
सायं समादाय निकामपीत-
　सुप्तद्विरेफं मुकुलं सरोजम् ।

---

53 C. स्वपक्षशोभाम्रुत सन्निधाय, D Fr निधाय व[वा]यं निजपक्षशोभा for निधाय वायं निजपक्षशोभां C. agreeing with the Sinhalese edition. A. B. पिधाय for निधाय

54 D. Fr अनुभिन्नभंगी° for विभिन्नवीची° C. D चारुतमा for चारुतया. D Fr चात्र for अत्र

55. D Fr. वीजत्वं for बीजत्वं D Fr पद्मवीजं for पद्मबीजं

56 C निसृत° for गलित° C सम्प्रेरयामास, D आपातयामास for व्यापारयामास C. °नीरधारा, D. °तोयधारा for °वारिधारा. C. D नाल for नालं.

57. D. नक्तं for सायं. D Fr. समालभ्य for समादाय. C. D. °दीर्घदण्डं

काचित्करास्फालितदीर्घदण्डा
भर्तुर्भुवः कूजयति स्म कर्णे ॥ ५७ ॥
सा पद्मिनी पद्मविलोचनेभ्यो
याते पतङ्गे विससर्ज भृङ्गान् ।
समुच्छ्वसत्कामुदगन्धलुब्धान्
स्थूलानिवोढाञ्जनबाष्पबिन्दून् ॥ ५८ ॥
नूनं पती स्थावरजङ्गमानां
पर्यायविश्रामपरार्थतन्त्रौ ।
एकत्र मज्जत्यधिवारि सिन्धो-
रन्यो जहौ तत्कमलाकराम्भः ॥ ५९ ॥
सरोजिनी तत्परिभुक्तमुक्ता
मूर्च्छातुरेव स्तिमिता विरेजे ।
निद्राहृताम्भोजनिमीलिताक्षी
रुग्णं मृणालीवलयं दधाना ॥ ६० ॥
कृतोपकारस्य निधाय जग्मु-
र्द्वयं द्वयोरम्बुरुहाकरस्य ।
भृङ्गावलीष्वञ्जनमायताक्ष्यः
पद्मेषु दन्तच्छदयावकं च ॥ ६१ ॥

---

for °दीर्घदण्डा. A. C. पत्यु पृथिव्याः लगति स्म कर्णे for भर्तुर्भुव कूजयति स्म कर्णे.

58. D Fr वाष्पविन्दून् for बाष्पबिन्दून

59. C. D वासरजंगमानाम् for स्थावरजंगमानाम् Agreeing with the Calcutta and Sinhalese editions.

60 A. B. read this verse in the following way —सरोजिनी तत्परिभुक्तमुक्ता निद्राहृताम्भोजनिमीलिताक्षी । रुग्णं मृणालीवलयं दधाना मूर्च्छातुरेव स्तिमिता विरेजे.

61. D Fr भृंगावलिषु for भृंगावलीषु

सरः सहंसं सह कामिनीभि-
विंहाय तुल्यो वृषवाहनस्य ।
विभूषितो लंभितभषजानि-
रध्यास्त सौधं वसुधाधिनाथः ॥ ६२ ॥
आकृष्टदृष्टिर्गगनस्य लक्ष्म्या
लक्ष्मीभुजा वासरसन्धिभाजः ।
काचित्कुचानम्रतनुर्बभाषे
बाला सबालव्यजनैकपाणिः ॥ ६३ ॥
सकुङ्कुमस्त्रीकुचमण्डलद्युतिः
प्रवासिनां चेतसि चिन्तयातुरे
निधाय तापं तपनः पतत्यसौ
विलोलवीचावपरान्तसागरे ॥ ६४ ॥
इयं तनुर्वासरसन्धिचारिणी
जगत्सृजो विद्रुमभङ्गलोहिनी ।
समं विधत्ते मुकुलं सरोरुहै-
र्हिरण्यबाहोरपि हस्तपङ्कजम् ॥ ६५ ॥
अयं प्रमाणं पयसः पयोनिधौ
निमज्ज्य संदर्शयतीव भानुमान्

---

62 B. सुन्दरीभि, D. भामिनीभि for कामिनीभि. Fr. विसृज्य for विहाय.

63 D Fr आकृष्टचक्षु for आकृष्टदृष्टि B C गगणस्य for गगनस्य D. Fr. पद्माभुजा for लक्ष्मीभुजा

64 D. Fr °स्तनवर्तुल° for °कुचमण्डल° A B प्रवासिनीचेतासि for प्रवासिनां चेतसि. D. Fr विवाय for निधाय D Fr °भंगावपरान्त° for °वीच वपरान्त° A. B agreeing with the Sinhalese edition.

65. D Fr. °कारिणी for °चारिणी. D Fr. जगत्कृत for जगत्सृज· Fr. मकुलं for मुकुलं.

66 C D वीचीबलयस्य for वीचिवलयस्य. B C read this verse after the 67th stanza of our text.

करेण वीचीवलयस्य मस्तके
विभाव्यमानस्फुरिताग्रकोटिना ॥ ६६ ॥
विकीर्णसन्ध्यारुणितं शतक्रतो-
र्दिशः प्रदेशादभिनिष्पतत्तमः ।
पतङ्गतेजःपरितापलोहितं
जगत्क्रमेण व्रजतीव निर्वृतिम् ॥ ६७ ॥
हिमांशुविम्बे रुहूतदिङ्मुख-
स्मितश्रियं बिभ्रति कोमलद्युतौ ।
विमृज्यमानं तमसा नभस्तलं
जहाति निर्मोकमिवाञ्जनस्विषा ॥ ६८ ॥
अथैवमस्यावसरे वचःश्रियः
समीक्ष्य निष्ठामुपनीतमास्थया ।
अपाययन्त प्रमदा मदालसाः
स्खलद्गिरास्तं मधु लम्भितादराः ॥ ६९ ॥
प्रियोपनीतं पिबतोऽधिवासितं
नपस्य गण्डूषमथ प्रकामतः ।
बभूव दन्तच्छदपल्लवस्तदा
निपीतपानावसरोपदंशकः ॥ ७० ॥

---

67 C प्रकीर्ण°, D. प्रसृप्त°, Fr विसृप्त° for विकीर्ण°. C D मरुत्वत for शतक्रतो.

68 D Fr हिमांशुविम्बे for हिमांशुविम्बे B. C विहीयमानं for विमृज्यमानं

69 D. Fr विलोक्य पानाम्बुपनीतमास्थया for समीक्ष्य निष्ठामुपनीतमास्थया The marginal note on Fr says —पानामापानभूमिमित्येके But not in the same ink as that of its text

70 C. °सरोपदशक°, D Fr °सरावदंशक for °सरोपदंशक

प्रियेण वध्वा मधुलासितोत्पलं
विपक्षगोत्रेण निगद्य लम्भितम् ।
अपीतमप्यक्षि विधाय रागवत्
ततान सद्यः श्रमवारि गण्डयोः ॥ ७१ ॥

त्विषा मुखेन्दोर्मुकुलत्वमम्बुजे
करेण नीते सति शर्वरीकृतः ।
प्रियेक्षणस्य प्रतिबिम्बमाचरत्
सरोजकृत्यं मधुभाजि भाजने ॥ ७२ ॥

यियासुना पङ्कजगर्भसौरभं
मुखं तदीयं प्रतिबिम्बमूर्तिना
समन्मथेनेव तरङ्गितासवे
मुहुश्चकम्पे चषके हिमांशुना ॥ ७३ ॥

विलासवत्यो मदघूर्णलोचना
निरूपयन्त्यः शचिरूप्यभाजने ।
स्थितस्य मुग्धा मधुनो न जज्ञिरे
स्वरूपमिन्दुप्रतिरूपगोपितम् ॥ ७४ ॥

विधय मानादपि पूर्वमासवः
प्रवृद्धवामत्वमनन्यसाधितम् ।

---

71 D नृपेण for प्रियेण. D पत्न्या for वध्वा . C गल्लयो for गण्डयोः. A. B विपक्षगोत्रेण नृपेण लंभितं निगद्य वध्वा मधुलासितोत्पलं for प्रियेण वध्वा मधुलासितोत्पलं विपक्षगोत्रेण निगद्य लंभितं.

72. D. Fr प्रतिविम्बं for प्रतिबिम्बं.

73. D समीरितासवे for तरंगितासवे. D. भृशं for मुहु . Corrected to भृशं in the margin of D.

74. B C. मदघूर्णितेक्षणा for मदघूर्णलोचना. D. विलोकयन्त्य· for निरूपयन्त्य . B शुचिरौप्य°, C. शुचिश्वेत° for शुचिरूप्य°. C. Breaks the metre.

स्मरं नु तासां हृदये विलोचने
बबन्ध रागं नु मुखे नु सौरभम् ॥ ७५ ॥

इति प्रबन्धाहितपानकातरं
प्रियाङ्कतल्पे शयितं निशात्यये ।
व्यबोधयन्मङ्गलवन्ति वन्दिनो
विधाय वाक्यानि विधातृतेजसम् ॥ ७६ ॥

जहिहि शयनमुद्रमस्य कालः
समुपनमत्यनुरक्तमण्डलस्य ।
भवनशिरसि कीर्णपादधान्नो
भवत इव क्षततामसस्य भानोः ॥ ७७ ॥

विरामः शर्वर्या हिमरुचिरवाप्तोऽस्तशिखरं
किमद्यापि स्वापस्तव मुकुलिताम्भोरुहदृशः ।
इतीवायं भानुः प्रमदवनपर्यन्तसरसीं
करेणाताम्रेण प्रहरति विबोधाय तरुण ॥ ७८ ॥

समुत्तिष्ठन्त्येते निगडकृतझङ्कारमपरं
शनैराकषन्तः करटतटलीनालिविततीः ।
निरस्यन्त्यो हेलाविधुतपृथुकर्णान्तपवनै-
र्द्विपास्ते दन्ताग्रस्थितकरमुदस्याननतटम् ॥ ७९ ॥

पादेनैकेन तिष्ठन् पटुपटहरवैर्बोधितस्ते मयूरः
पश्चात्पक्षेण सार्धं चिरशयनगुरुं पादमन्यं वितत्य ।

76 D. अबोधयन् for व्यबोधयन् D वन्दिन for वन्दिन .
78 C यामिन्या , D शार्वर्या for शर्वर्या D स्वप्नस्तव for स्वापस्तव C. मित्र , D सूर्य for भानु
79 D लीला° for हेला° C. मरुतै for पवनै C. इभा , D. गजा° for द्विपा°.
80. C. कलापी for मयूर D. पश्चादुच्छेन साकं for पश्चात्पक्षेण सार्धं D. प्रमृत्य for वितत्य. D °यष्टौ for °यष्ट्यां.

उत्फुल्लोध्दूतपक्षच्युतहिमकणिकावृष्टिरावासयष्ट्यां
दृष्ट्वा मार्तण्डधामोदयमुदितमुदोज्जृम्भते ताण्डवार्थी ॥ ८० ॥
पूर्वाद्रौ सूर्यपादे चरति विसृजता चन्द्रपादावदातं
तल्पं तेनानुचक्रे मलयतरुरसामोदितांसद्वयेन ।
उल्लिद्रश्वेतपद्मप्रकरपरिकरच्छन्नवीचीवितानाः
दुद्यन्मन्दं सरस्तः सलिलगुरुबहत्पक्षतिर्मल्लिकाक्षः ॥ ८१ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य
कृतौ उद्यानक्रीडावर्णनो नाम तृतीयः सर्गः ॥

— o —

81 D. °मोदिताश° for °मोदितांस.° D. °ट्टहत्पक्षति· for °बृहत्पक्षति· C मल्लिकाख्य for मल्लिकाक्ष .

चतुर्थः सर्गः ।

अथ स प्रविजृम्भिते शुचौ
विधुरश्वेतसि पुत्रकाम्यया ।
सुबहुद्विजसात्कृताखिल-
द्रविणः स्तोममयष्ट भूपतिः ॥ १ ॥

बहुशो विफले तदध्वरे
सति पुत्रीयमनन्तरं क्रतुम् ।
निरवर्तयदृष्यशृंग इ-
त्यभिधानप्रथितस्तपोनिधिः ॥ २ ॥

उदियाय ततोऽस्य कश्चन
श्रितचामीकरभाजनं चरुम् ।
परिगृह्य रुचा परिज्वलन्
ज्वलतो रोहितवाजिनः पुमान् ॥ ३ ॥

प्रविवेश विशाम्पतिश्चरुं
चतुरंशीकृततेजसात्मना ।
प्रविधातुमरातितापित-
त्रिदशाश्रुस्रववृष्टचवग्रहम् ॥ ४ ॥

1 D. व्यथित for विधुर . C. °द्रविणो यागं for °द्रविण स्तोमं.

2 D. बहुधा for बहुश .

3. C. D. लोहितवाजिन for रोहितवाजिन

4 C. चतुरंशीकृतबाहुतेजसा for चतुरंशीकृततेजसात्मना. C. D. अरातिराजित° for अरातितापित°.

दयिताभिरनन्ततेजसा
मुनिनासौ परिकल्प्य लम्भितः ।
अशितः प्रविभज्य भूपते-
स्तिसृभिर्गर्भमबीभवच्चरुः ॥ ५ ॥
सुतयोर्भवतः स्म वालिजिद-
भरतौ कोसलकेकयेन्द्रयोः ।
यमजौ यमतुल्यतेजसौ
सुषुवाते समये सुमित्रया ॥ ६ ॥
अथ दिव्यमुनिप्रवर्तित-
प्रसवानन्तरजातकर्मणां ।
रुरुचे चरुजन्मनां दशा
तनुसंदर्शितदन्तकुड्मला ॥ ७ ॥
न स राम इह क्व यात इ-
त्यनुयुक्तो वनिताभिरग्रतः ।
निजहस्तपुटावृताननो
विदधेऽलीकनिलीनमर्भकः ॥ ८ ॥

---

5. D. अपारतेजसा for अनन्ततेजसा. C. D. परिकल्पलंभित. for परिकल्प्य-लंभित. D. अजीजनत् for अबीभवत्. Fr. reads the verse in the following way —अशित. परिकल्पलम्भितो सुनिनासौ प्रविभज्य भूपते । दयिता-भिरबीभवच्चरुस्तिसृभिर्गर्भमनन्ततेजसा. Agreeing with the Sinhalese edition.

6. D. बालिजिद् for वालिजिद्. C. D. कोशल° for कोसल°. C D. agreeing with the Sinhalese edition.

7. C. D. °दन्तकुट्मला for °दन्तकुड्मला.

8. C. दाशरथिः, D दाशरथः for राम इह. C. रमणीभिः for वनिताभि.. D. ववृते for विदधे.

मुखमाहतधूलि गण्डयोः
करघृष्टाञ्जनदानमस्य तत् ।
विबभौ सुरदन्तिनो यथा
वदनं दन्तचतुष्टयोज्ज्वलम् ॥ ९ ॥
कतरस्तव तात उच्यता-
मिति धात्रीवचनप्रचोदितः ।
रुचिरेण करेण निर्दिशन्
जगदीशं प्रमदेन संदधौ ॥ १० ॥
अयि दर्शय तत्किमुन्दुराद्-
भवतोपात्तमिति प्रचोदितः ।
प्रविदर्शयति स्म शिक्षया
नवकं दन्तचतुष्टयं शिशुः ॥ ११ ॥
इतरेऽपि सरोजशीतल-
मृदुभिः साञ्जनराजिभिः करैः ।
शयने समवाहयन् पितु-
श्चरणौ मातृजनेन चोदिताः ॥ १२ ॥
शयनीयगतस्य भूपतेः
शिशवः क्रोडनिवेशवाञ्छया ।
निशि वर्धितमातृसंपदं
कलहं कोमलजल्पितं दधुः ॥ १३ ॥

---

9 C D आहतधूलि for आहतधूलि D गलयो for गण्डयो C शुभ्रभे D प्रबभौ for विबभौ D हस्तिन for दन्तिन

10. D Fr कतम for कतर D Fr °वचनेन चोदित for °वचनप्रचोदित D Fr जग्रहे for सन्दधौ

11 C उन्दराद् for उन्दुराद् D Fr प्रणोदित for प्रचोदित

12 C D मसृणै for मृदुभि C D Fr नोदिता for चोदिता

13 C D °संमद for °सपदं. Agreeing with the Sinhalese editor C D. मञ्जुलजल्पितं for कोमलजल्पित.

क्रमशश्चरुजन्मनो वपुः—
परिवृद्धिर्महिता महीयसः ।
प्रतिवासरमायुषः क्षय-
स्त्रिदशारेरपि तुल्यमासतुः ॥ १४ ॥
धनुषि प्रतिलब्धपाटवे
नृपतेरन्यतरेद्युरात्मजे ।
भवनं भवनस्य शासितुः
प्रतिपेदे मुषितक्रतुर्मुनिः ॥ १५ ॥
स्वकिरीटमणिप्रभाम्बुभिः
प्रथमक्षालितपादपङ्कजम् ।
नपतिः समवीभवन्मुनिं
पुनरुक्तैरिव पाद्यवारिभिः ॥ १६ ॥
कुशलं परिपृच्छ्य सर्वगं
मुनिरध्यासितरत्नविष्टरः ।
उपविष्टमसौ भुवस्तले
विरतं राजमुनिं जगौ गिरम् ॥ १७ ॥
स्वजनादपि लब्धवैशसे
नृपतित्वे शठभृत्यसंपदि ।
प्रियवादिरिपावपि स्थितो
नृप दिष्ट्या कुशलेन वर्तसे ॥ १८ ॥

---

15. D. Fr. °कौशले for °पाटवे.

16. C. D. प्रथमं for प्रथम°. Agreeing with the Sinhalese edition

17. D. ऋषि° for मुनि. C. °वज्रविष्टर for °रत्नविष्टर C D Fr राजवरं for राजमुनि. C D Fr गिरं जगौ for जगौ गिरम्

18. C. °कन्दने, D Fr. °घातने for वैशसे. Corrected to घातने in the margin of D. The original reading is blotted with lac ink. A. B. वर्धसे for वर्तसे.

द्विषतो भवबन्धभेदिना
दृहतश्चेतसि योगवह्निना ।
न जहाति विपत्तिरद्य नः
परसंपत्तिषु निःस्पृहानपि ॥ १९ ॥

अनुयान्ति समन्ततो मखे
निपतच्छोणितवृष्टयो दिशः ।
पवनाहतवृंतविच्युत-
प्रसवाः किंशुककाननश्रियः ॥ २० ॥

मघतामपि नस्तपस्यतां
धतवैकङ्कतसाधनस्रुचाम् ।
स्फरदर्चिषि देवतामुखे
हुतमद्यश्च उदस्यतेऽरिभिः ॥ २१ ॥

सदसः समयेषु वृत्तये
विधिनाहृतहुतांशभाजिनः ।
युधि तं जहि पश्यतोहरं
गुरुणा रामशरेण राक्षसं ॥ २२ ॥

19 B Adds the first line in margin The fourth line in C. lacks two syllables at the end [नि स्पृहा°] D. Fr. निस्पृहान for नि स्पृहान्

20 D अनुयन्ति for अनुयान्ति. C D सवे for मखे. B. C. निपनच्छो-हित° for निपतच्छोणित°.

21. C reads the verse thus —स्फुरदर्चिषि देवतामुखे घृतवैकंकतसाध-नस्रुचां मृषतामपि नस्तपस्यतां हुतमद्यश्च उदस्यते रिपु. Agreeing with the Sinhalese edition

22 D Fr महता for गुरुणा D Fr नैर्ऋतं for राक्षसं.

क्षमते न जनं त्वदर्पितं
यमिनामिन्द्ररिपुस्तु हिंसितुम् ।
शशिनं मृगशत्रुराश्रितं
न मृगं प्रार्थयते हि जातुचित् ॥ २३ ॥

उरगा इव घर्मपीडिताः
क्रतुशत्रुव्यथितास्तपस्विनः ।
उपयान्त्युपतापनाशनं
विपुलं त्वद्भुजचन्दनद्रुमम् ॥ २४ ॥

वयमर्ककुलैककाश्रया
न परं भर्तिमाश्रयामहे ।
न हि जातु पतन्ति पल्वले
जलदा वारिधिपानलम्पटाः ॥ २५ ॥

त्वदृणु प्रियमाश्रयामहे
न परस्मादतिविस्तराण्यपि ।
पयसः कणमेव चातको
जलदादत्ति बहूनि नान्यतः ॥ २६ ॥

---

23 A has the following for the first two lines —यमिनामधिहिंसितुं जनं क्षमते नेन्द्ररिपुस्त्वदर्पितं Agreeing with the Sinhalese edition. C क्षमते for क्षमते. C D पुरुष for न जनं C. D. इन्द्ररिपुर्न for इन्द्ररिपुस्तु

24. C ताप°, D Fr. दाह° for घर्म° D सवशत्रु°, Fr. मखशत्रु° for क्रतुशत्रु°. C. Fr महितं for विपुलं

25 C D. लोलुपा for लम्पटा C seems originally to have had लोलुपा which has been altered and लम्पटा inserted in the margin.

26 Fr त्वदृणुप्रियमाश्रयामहे for त्वदृणु प्रियमाश्रयामहे Wrongly worded in Fr and in the Calcutta and Sinhalese editions Our text is supported by four Mss. D. Fr. अतिविस्तरं त्वपि for अतिविस्तराण्यपि.

नृपताविति वेदितापदा
मुनिना जोषमभूयत क्षणम् ।
महतां न कदाचिदर्थना
गुरुनिर्बन्धविनष्टसौष्ठवा ॥ २७ ॥

परिपूततनुर्द्विजाशिषा
शुभया त्वत्प्रियतावृतः स्वयम् ।
पृथुकः पृथुकीर्तिरर्पितो
भवति श्वः समराय यास्यति ॥ २८ ॥

इति वस्तुमवस्तुकाङ्क्षिणे
स मुदास्मै समुदाहृतप्रियः ।
शरणं शरणार्थिने ददा-
वृषये विश्वभुजो नरेश्वरः ॥ २९ ॥

चलिते च सुतं तपस्यति
प्रथमाहूतमृषेर्नमस्यया ।
उपनीय चिराय वर्जितं
स्वयमङ्कं प्रियमादधे वचः ॥ ३० ॥

समवेदि यतस्त्वदर्थिना
कथितं यद्रुतिक्रमं त्वया ।
अवधूय ततस्तदापदं
चिनु बाणेन कुलोचितं यशः ॥ ३१ ॥

---

27. C. D. अर्थिता for अर्थना.
28. C. D परिपूतवपुः for परिपूततनु . D Fr गच्छति for यास्यति.
29 D. Fr मुनये for ऋषये
30 D Fr तपस्विनि for तपस्यति
31. Fr गदितं for कथितं. Fr कुलागतं for कुलोचितं.

अविजित्य जयैषिणां सदा
न भुवः शक्यतयानुरक्षितुम् ।
ननु दिग्जयसंभृतो महा-
विभवोऽयं भवतः प्रसंगतः ॥ ३२ ॥

भुवनानि बिभर्ति कश्चन
स्वजनानेव परः प्रयत्नतः ।
इतरस्तनुमेव केवलं
प्रभुरन्यो भरणेऽपि नात्मनः ॥ ३३ ॥

इति पक्षचतुष्टये स्थिते
रघवः पूर्वमुदस्य मानिनः ।
क्षपयन्ति यशः क्रमागतं
न हि पक्षान्तरसंपरिग्रहात् ॥ ३४ ॥

जनमन्यहितप्रवर्तनं
स्वयमेवाभिसरन्ति सम्पदः ।
नियतं निजकृत्यलम्पटः
पुरुषः स्वार्थत एव हीयते ॥ ३५ ॥

पुरुषस्य कृतं भुजद्वयं
प्रविधातुं द्वयमेव वेधसा ।
सुहृदामुदयं च विद्विषा-
मवलेपप्रतिघातमेव च ॥ ३६ ॥

---

33. B C. इतरो वपुरेव for इतरस्तनुमेव C D. केवलां for केवलं

34. B C. क्षययन्ति for क्षपयन्ति.

35. B. C. अन्यहितप्रवर्तकं for अन्यहितप्रवर्तनं. D. Fr °कार्यलोलुप for °कृत्यलंपटः.

36. C. च दुर्ह्रदाम्, D. प्रविघ्नताम्, Fr विनिघ्नताम् for च विद्विषाम्.

शरणोपगतं न पाति यो
न भिनत्ति द्विषतां समुन्नतिम्
न स बाहुरसाधनक्षमो
नरवृक्षप्रभवः प्ररोहकः ॥ ३७ ॥
परकृत्यजडो यशोर्जने
जठरैकप्रवणो निरुत्सुकः ।
पशुरेव बुधैर्निगद्यते
यवसग्रासनिवृत्तमानसः ॥ ३८ ॥
न पशुः पुरुषाकृतिर्यतो
नृगुणभ्रष्टतया न पूरुषः ।
विरतव्रतपौरुषस्पृहः
किमु कोऽपि द्रुहिणेन निर्मितः ॥ ३९ ॥
अकृतद्विषदुन्नतिच्छिदः
श्रितसंरक्षणवन्ध्यकर्मणः ।
पुरुषस्य निरर्थकः करः
किल कण्डूयनमात्रसार्थकः ॥ ४० ॥
अशने रसनानि देहिनां
कृतयोगानि मुखेषु भूरिशः ।
न न सन्ति तदेषु दुर्लभं
प्रभ यत्स्यादभयं प्रजल्पितुम् ॥ ४१ ॥

---

37. B. C. शरणोपनतं for शरणोपगतं. D Fr. छिनत्ति for भिनत्ति. C. D असाधनप्रभु- for असाधनक्षमः.

38. B. reads this verse after the 39th stanza of our text Fr. जनै for बुधैः.

39. D. Fr. विगत° for विरत°. C. द्रुहणेन, D. द्रुघणेन for द्रुहिणेन

40 A. °साधक-, C. °साधन- for °सार्थक-.

तव जीवितसंशयेष्वपि
न परित्याज्यमिदं कुलव्रतम् ।
सुलभं प्रतिजन्म जीवितं
हृदयं धर्मरतं हि दुर्लभम् ॥ ४२ ॥

विरते शवतामभिव्रज-
त्यभिषेकोत्सवदुन्दुभौ क्षणाद् ।
इति पातिनि जीविते कथं
सुखमालम्ब्य सृजन्ति सत्पथम् ॥ ४३ ॥

यशसि व्रज यत्नमुज्झित-
स्वसुखप्रीतिरुपैहि वा तपः ।
अधिगम्यमसारमास्थिरं
विषयास्वादसुखं पशोरपि ॥ ४४ ॥

यशसा सुकृतेन संग्रहो
नियतं धर्ममुपार्जितो यशः ।
अनुगच्छ तदेकसंग्रहा-
दुभयं लभ्यमितीह सत्पथम् ॥ ४५ ॥

42 C. °संशये यदि for °संशयेष्वपि B C तु for हि

43 A is the Tala-leaf Mss omit this stanza But the codex B leaves a blank space with the figure marking the number of the verse C विरत शवतामभिव्रजत्यभिषेकोत्सवदुन्दुभि. क्षणाद् Agreeing with the Calcutta edition D. समियत्वमभिव्रजत्यसावभिषेकोत्सवदुन्दुभि क्षणाद् Agreeing with the Sinhalese edition Fr शम[मि]ता for शवता In other respects it agrees wite C Dr R G. Bhandarkar, the greatest orientalist on this side of India, has proposed a preferable reading for these obsure lines. And we have adopted this reading for our text

45 D. प्राप्यं far लभ्य.

ननु तावदिहैव सज्जन-
प्रतिरक्षाविधिगम्यमक्षयम् ।
फलमिन्दुकरोपरञ्जित-
प्रहसत्कौमुदकोमलं यशः ॥ ४६ ॥

प्रयतः प्रतिपद्य तत्तपो-
वनमुग्रं त्वमुदग्रविक्रमः ।
सहसा सह कौशिकेन तं
यमिनां कृन्त निवर्हकं युधि ॥ ४७ ॥

पितुरित्थमनाकुलं वच-
स्त्वदुपश्रुत्य ननाम पादयोः
सह सिद्धवनं यियासुना
समरायावरजेन राघवः ॥ ४८ ॥

तमसि स्फुरदंशुमद्द्युति-
प्रहृते संसदि सौखरात्रिकः ।
यतये निरयीयतत्सुतौ
नृपतिर्मन्त्रपवित्रदर्शितौ ॥ ४९ ॥

अनुजग्मतुरश्रुवर्षिणो
हृदयैः पौरजनस्य राघवौ ।
मुनिमेनमनाकुलातुरै-
रनुयातावशिवैकचिन्तया ॥ ५० ॥

---

46 D °प्रहसत्तुष्कर° for° प्रहसत्कौमुद°

47 C Fr प्रतिपद्य तपोवनं युधि प्रयतस्त्वं सह कौशिकेन तत् । जहि संयमिना निवर्हकं सहसौर्यं तमुदग्रविक्रम for our text C. Fr agreeing with the Sinhalese edition C D. Fr निवर्हकं for निवर्हकं.

यामिनः पथि चैतिहासिका-
दुपशृण्वन् विविधाश्रयाः कथाः ।
क्रमथं न विवेद राघवो
बलयानीतबलः स विद्यया ॥ ५१ ॥

अथ वज्रभृतः सुहृद्द्रुहो
विषयो यः स्नपनेन विश्रुतः ।
नृवरो निजगाद तत्पुरं
पिशिताशीनिहतं निरीक्ष्य सः ॥ ५२ ॥

न भुनक्ति पुरा पुरश्रियं
परितः कीर्णकरङ्कसङ्करा ।
अवमग्नशिरःकपालदृग्-
विवरप्रोद्गतशाद्वला मही ॥ ५३ ॥

फणिभिः प्रतिबिम्बमातरः
शितिभिर्भान्ति शिरोऽवलम्बिभिः ।
रचितैरिव वेणिबन्धनै-
र्विरहादस्य पुरस्य शासितुः ॥ ५४ ॥

भुवि भोगिनिभं विलोकयं-
स्तुदुमो हारमहार्यवेपथुः ।
हरिहस्तहतस्य दन्तिनः
कररन्ध्रे निभृतं निलीयते ॥ ५५ ॥

51. B अनुशृण्वन्, C. अभिशृण्वन् for उपशृण्वन् C D क्रमथुं for क्रमथं C D अनीतबल for आनीतबल .

53 C. D. पुरश्रिय. for पुरश्रियं.

54. D. Fr. प्रतिविम्बमातर for प्रतिबिम्बमातर..

55. B. C. हस्तिन for दन्तिन .

प्रतिमा विशदेन लूतिका-
पटलेनावृतदृष्टिरीक्ष्यते ।
रुदितैरिव पुष्पितेक्षणा
विपुलत्रासकृतैरनेकशः ॥ ५६ ॥

श्लथभित्तिविरूढभूरुह-
स्थिरमूलाग्रविनिर्गमक्षतम् ।
स्फुटतीव भृशं शुचातुर
हृदयं तद्गृहचित्रयोषिताम् ॥ ५७ ॥

नकुलः परिजीर्णवबुध-
प्रतिविम्बाननमभ्यरन्ध्रतः ।
परिकर्षयति क्रुधा यथा
स्फुरितं तद्रसनं सरीसृपम् ॥ ५८ ॥

इति जल्पति तत्र राक्षसी
पुरतः प्रादुरभूद्विदेलिमा ।
मकराकरपायिधामभिः
क्षतयक्षाकृतिरुग्रविग्रहा ॥ ५९ ॥

नवकृत्तविलासिनीकर-
प्रसवोत्तंसविभूषिताननना ।
नृशिरस्ततिमेखलागुण-
स्फरणक्रूरकटुक्वणत्कटिः ॥ ६० ॥

---

57 B C शुचाऽऽतुरं for शुचातुरं

58. D. Fr. °प्रतिविम्ब° for °प्रतिबिम्ब°.

59 B. C यक्षिणी for राक्षसी.

परितः स्फुरदन्त्रपाश्यया
परिणद्धाकुलकेशसंततिः ।
घनशोणितपङ्ककुङ्कुम-
प्रविलिप्तस्तनकुम्भभीषणा ॥ ६१ ॥
इति तामतिभीमदर्शना-
मभिवीक्ष्योभयतस्तपोधनम् ।
धनुषोरवनीभुजः सुतौ
सपदि न्यस्तशरावतिष्ठताम् ॥ ६२ ॥
स वसिष्ठतनूजपातित-
क्षितिपस्वर्वसतिप्रदो मुनिः ।
घृणिनो नृपतेः कृतस्मय-
स्तनयं वीक्ष्य जगाविदं वचः ॥ ६३ ॥
इति सार्वजनीनसम्पदः
प्रलयं देशवरस्य कुर्वतीम् ।
न निहत्य शरेण सूरिभि-
स्त्वमधर्मी ध्रुवमेष गीयसे ॥ ६४ ॥
शतमन्युरवर्णवृत्तये
न वधः स्त्रैण इति प्रचिन्तयन् ।
निजघान विरोचनात्मजां
कुलिशेन त्रिदिवस्य शान्तये ॥ ६५ ॥

61. D Fr परिवद्ध° for परिणद्ध° C. D संहति for सन्तति

62 B. C तपोनिधिम् for तपोवनम्

63. D Fr घृणिनो नृपतेर्जगाविदं तनयं वीक्ष्य कृतस्मयो वच for घृणिनो नृपते कृतस्मयस्तनयं वीक्ष्य जगाविदं वच. The Mss D Fr agree with the Sinhalese edition D Fr वशिष्ठ° for वसिष्ठ°.

64. D Fr सर्वजनीन° for सार्वजनीन°. A B कुर्वतीमनिहत्य for कुर्वती न निहत्य.

वनितावपुषि द्विषज्जने
पुरुषाकारविशेषितेऽपि वा ।
न हि भद्रकरं शरीरिणां
प्रहृतार्हे करुणावलम्बनम् ॥ ६६ ॥

युवतेरपि साधवः सुखे
जगतो लुप्तवतश्चिरस्थितिम् ।
तुलयन्ति न राम विक्रमं
द्विषतीतापमगुण्यवृत्तिभिः ॥ ६७ ॥

अपि वित्थ इदं धनुर्भृतो-
र्भवतोः पौरुषरोषवित्तयोः
न भजन्ति यशःश्रियं रणे-
भ्युदिते हन्त तपोधनद्विषः ॥ ६८ ॥

न विरोचनजन्मनोरिदं
युवयोरायुधयुद्धतन्त्रयोः ।
द्विजवृद्धनिषेवणक्षमं
महतोः श्रोत्रमलं विराजते ॥ ६९ ॥

---

66. Fr. प्रकृते स्यात् for प्रहृतार्हे. Fr. agreeing with the Sinhalese edition.

67. C. reads the following for our text —तुलयन्ति न साधव सुखे जगतो लुप्तवतश्चिरस्थितिम् । युवतेरपि राम साधवो द्विपतीतापमगुण्यवृत्तिभि . Agreeing with the Sinhalese edition. D. लोपयितुम्, Fr. लुप्तवताः for लुप्तवत . The reading of the Ms. Fr. seems to be corrupt.

68 Fr. reads the following for our text —रण अभ्युदिते धनुर्भृतो-र्भवतो· पौरुषरोषवित्तयो । अपि वित्थ इदं यश श्रियं न भजन्तीति तपोधनायिषा ? Agreeing with the Sinhalese edition.

69. D. Fr. with the Sinhalese edition read the following for our text. द्विजवृद्धनिषेवणक्षमं युवयोरायुधयुद्धतन्त्रयो । न विरोचनवंशजन्मनोर्म-हतोः श्रोत्रमिदं विराजते·

इति मुनिचोदितो हृदि सुकेतुसुतामिषुणा
रघुपतिरक्षिणोदशनिपातपटुध्वनिना
स्फटितकुचान्तरस्रवदसृक्स्तुतिनः करणात्
प्रथममपाययुस्तदसवो नु शरो नु बहिः ॥ ७० ॥

ऋषिरिति विघ्नघातविधिसञ्चितसद्यशसं
तनुजमयोजयद्दशरथस्य सुरास्त्रगणैः
असुरनिशाचरक्षतजपानपरैर्विकस-
ल्लसितहुताशनद्युतिपिशङ्गितदिग्वदनैः ॥ ७१ ॥

वदनविनिर्गतज्वलितवह्निशिखावितते-
रुपगतवन्ति राममथ तानि ततानि रुचा
शशधरखण्डकोणकुटिलस्फुटकोटिखरं
दशनचतुष्टयं पृथु दधन्ति बहिः प्रसृतम् ॥ ७२ ॥

रक्षोहव्यहविर्भुजं स हि तथा संधूप्य शस्त्रेन्धनैः
प्रत्युद्गम्य सुदूरमेव हरिणैरन्वीयमानो बहिः
छेदाय प्रसृतैरसेकिमलताजालप्रवालश्रियः
कूजत्कोकिलमाश्रमस्य निकटं सायं प्रपेदे मुनिः ॥ ७३ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य
कृतौ श्रीरामोत्पत्तिर्नाम चतुर्थः सर्गः ॥

---

70. D. मुनिनोदित for मुनिचोदित. C. D. अक्षणोत् for अक्षिणोत्. C. D. वहि for बहि.

71. C. D. मुनि for ऋषि

72. D. वहि for बहि.

73. C. स तु, D. स च for स हि. D. हि for बहि.

पञ्चमः सर्गः ।

ततस्ततं तापसकन्यकाजन-
प्रसिक्तसंवर्धितवृक्षमण्डलैः ।
सहस्रशस्तानितसामनिस्वन-
प्रवर्तिताखण्डशिखण्डिताण्डवम् ॥ १ ॥
विहङ्गपानाय महीरुहां तले
निवेशिताम्भःपरिपूर्णभाजनम् ।
विशोषणार्थाहितपुण्यवल्कल-
प्रताननम्रीकृतवृक्षमस्तकम् ॥ २ ॥
कृतासु नीवारविभागवृत्तिषु
स्वकीयमंशं मृदुहस्तसंपुटैः ।
हरद्भिरालोहितगण्डमण्डलैः
प्लवङ्गमैः सेवितशैलकन्दरम् ॥ ३ ॥
स्वमङ्कमारुह्य सुखं परिष्वपत्-
कुरङ्गशावप्रतिबोधशङ्क्या ।
चिरोपवेशव्यथितेऽपि विग्रहे
सुनिश्चलासीनजरत्तपोधनम् ॥ ४ ॥
हिरण्यरेतःशरणानि सर्वतः
प्रवृत्तपुण्याहुतिधूमधूसरम् ।
बृहल्लतातानभृतः फलेग्रहे-
रधस्तरोरासितशायितातिथि ॥ ५ ॥

---

1. A. B °जनात्रिपिक्त° for °जनप्रसिक्त°

2. D. Fr. प्रभार° for प्रतान°. The Calcutta edition as well as the Sinhalese edition agree with our codices A B. C.

5. C. D. बृहल्लता° for बृहल्लता° D. आतानभुज for आतानभृत D. आशित° for आसित°. D agreeing with the Sinhalese edition.

तपस्विवर्गस्य वधूषु वह्नये
वितन्वतीषु प्रकृतां बलिक्रियाम् ।
मृगाङ्गनाभिः परिलिह्य जिह्वया
विनोदितत्याजितरोदितच्छिशु ॥ ६ ॥
बलिक्रियातानितलाजकर्षणे
समेतकीटप्रतिघातशङ्क्या ।
कुशस्य मुष्ट्या शनकैस्तपस्विभिः
प्रमृज्यमानानलमन्दिरोदरम् ॥ ७ ॥
महीरुहभ्रष्टविहङ्गपोतिका-
सुखोपवेशाय तपस्विसूनुभिः ।
इषीकतलेन विधाय मार्दवं
क्वचित्समासज्जितनीडपञ्जरम् ॥ ८ ॥
सवारिमृत्स्नापरिपूर्णखातक-
प्रजन्यमानाङ्कुरबीजमेकतः ।
प्रहृष्टसारङ्गकिशोरवल्गित-
प्रकीर्णपुञ्जीकृतशुष्यदिङ्गुदि ॥ ९ ॥
समीरणैराहुतिगन्धपावनै-
र्वितानितोद्दामशिखण्डिनिस्वनम् ।
तपोवनं तत्तपसामधिश्रयः
कुमारयुग्मेन विवेश कौशिकः ॥ १० ॥

---

6. Fr °वर्णस्य for °वर्गस्य. D. Fr. बधूषु for वधूषु C. अविलिह्य for परिलिह्य Fr. °शिशुं for °शिशु Fr. agreeing with the Sinhalese edition.

7. D. Fr प्रमज्यमानं शनकैस्तपस्विभि । कुशस्य मुष्ट्यानलमंदिरोदरम् for कुशस्य मुष्ट्या शनकैस्तपस्विभि । प्रमृज्यमानानलमन्दिरोदरं D. Fr agree with the Calcutta and the Sinhalese editions.

9. C. प्रजायमान° for प्रजन्यमान°. C. D. वीजं for बीजं B C. °इंगुदं for °इंगुदि.

विधित्सुरिष्टिं नृपतेरतन्द्रितं
सुतं ततो वैबुधलौकिकीमृषिः ।
समादिदेश प्रकृताय कर्मणे
चिराय तद्रक्षणरूप्यमादृतः ॥ ११ ॥

तमग्निमिन्धानमधिक्रतु भ्रमन्
रिरक्षिषुः सन् परितो रिपोरसौ ।
क्षमाभुजः सज्यशरासनः सुतो
हृतो जगादावरजं वनश्रिया ॥ १२ ॥

बिभर्ति नीवारवदम्बुजाकर-
श्रिया परीतं सततं तपोजुषाम् ।
अखातमाहावमनुष्त्रिमं परं
सदाफलं शस्यमिदं तपोवनम् ॥ १३ ॥

सवेदवेदाङ्गविदो यमव्यय
विदन्ति यत्नन पदं तपस्विनः ।
स लोककृत्यानि विचिन्त्य कानिचित्
तपस्यति स्मेह पुमान् पुरातनः ॥ १४ ॥

सुदर्शनच्छिन्नसमाहृतेन्धनं
द्विजेन पक्षव्यजनेन वीजितम् ।
त्रिनेत्रमूर्त्यन्तरमादिपूरुषो
जुहाव हव्यैरिह हव्यवाहनम् ॥ १५ ॥

11 D. Fr. ऋषि सुतं वैबुधलौकिकीं ततो विधित्सुरिष्टिं नृपतेरतन्द्रितं for विधित्सुरिष्टिं नृपतेरतन्द्रितं सुतं ततो वैबुधलौकिकीमृषिः. D. Fr. agree with the Sinhalese edition.

12. D. Fr इन्धन्तं for इन्धानं D Fr. agreeing with the Sinhalese and the Calcutta editions

14. D. वदन्ति for विदन्ति.

तपस्यति स्वामिनि शत्रुशातने
समित्कुशच्छेदनमात्रतत्परः ।
सुसंयतो नाभिननन्द नन्दकः
सुरारिवक्षःक्षतजासवं तदा ॥ १६ ॥

गदा रणदुन्दुभिभैरवं रणं
तदा समभेत्य भयं वितन्वति ।
शिरस्यपध्वस्तशिरस्त्रजालके
निमज्य मज्जां न जघास विद्विषाम् ॥ १७ ॥

नवं स्वकोशाहृतवारिधारया
वनं तरूणामनुगृह्णता रणे ।
न पाञ्चजन्येन जनस्य तेनिरे
भियो विशुष्काशनिभैरवैरवैः ॥ १८ ॥

सलीलमुद्दण्डसरोजविष्टरे
निषद्य पादेन पुरोऽवलम्बिना ।
परिस्पृशन्त्या चलवीचिमस्तकं
तदा किलागायि कलं नृपद्मया ॥ १९ ॥

फणावतामुद्धरणेषु वारिधि-
प्रवाहसिक्तावुदयाचलस्थितः ।
वितत्य पक्षावधिपः पतत्त्रिणां
व्यशोषयन्न प्रति सूर्यमायतम् ॥ २० ॥

16. C. reads the following for our text –तपस्यति स्वामिनि शत्रुशातने सुसंयतो नाभिननन्द नन्दक । समित्कुशच्छेदनमात्रतत्पर सुरारिवक्ष क्षतजासवं तदा. C. agrees with the Sinhalese edition.

17. C. रटद्दुन्दभभैरवं for रणदुन्दुभिभैरवं.

18. D. °कोषाहृतनीर° for कोशाहृतवारि°. D. भियो हि for भियो वि°.

विहारमारण्यकमिष्टवस्तुं
विहाय वल्केन समं वितूस्तयन् ।
इतः किल क्रोधपराहतो हरिः
पुरा प्रतस्थे बलिबन्धसिद्धये ॥ २१ ॥

ततः प्रहृत्येव गुणस्य संपदां
हिरण्यगर्भस्य विधतहिंसया ।
निषेव्यते श्वापदसंपदा पदं
तपस्विनामृद्धमिदं शमावहम् ॥ २२ ॥

प्रगृह्य पुच्छे शिशवस्तपस्विनां
मसीपयःसेककृतानिवासितान् ।
यदङ्गबिन्दून् गणयन्ति चापला-
द्विलोकय द्वीपिनमेनमग्रतः ॥ २३ ॥

इमौ हरी संहृतरोषशङ्कितौ
नितान्ततप्तौ तपनस्य दीप्तिभिः ।
तलं गजस्य स्रुतगण्डसंपदः
फणातपत्रं फणिनश्च वाञ्छतः ॥ २४ ॥

---

21 D. इत पुरा for इत किल A C क्रोधविमूर्च्छितो विभु for क्रोध पराहतो हरि D. किल प्रतस्थे for पुरा प्रतस्थे. The readings of D agree with the Sinhalese edition C बलिबन्धकर्मणे for बलिबन्धसिद्धये.

22. B. C. प्रहृत्येव for प्रहृत्येव.

23. C मशीपय°, D मषीपय° for मसीपय°. Fr. यदेहबिन्दून् for यदङ्ग बिन्दून्.

24. D Fr. हरी इमौ for इमौ हरी Agreeing with the Sinhalese edition D Fr °शङ्कितौ for °शङ्कितौ Agreeing with the Sinhalese edition

तथा गिरं व्याहरतैव रोदसी
वितत्य यातं पवनेन रंहसः ।
विधूनयत्तद्विपिनं द्विषद्बलं
ध्वजैरुपालक्ष्यत काकलाञ्छनैः ॥ २५ ॥
सरोषरक्षः प्रतिबिम्बविग्रहं
कृपाणपत्रे शरदम्बरत्विषि ।
विगृह्णतां जीवितपानलिप्सया
स्थितः समास्थाप्य यमो यथा बभौ ॥ २६ ॥
असंख्यगह्या अपि तत्र सैनिकाः
पिशाचरक्षस्तातीभिर्निरन्तरम् ।
कृतान्धकारं रथचक्ररेणुभि-
र्जगुर्जगत्सत्त्वरजस्तमोमयम् ॥ २७ ॥
चकार लक्ष्यं प्रथमो बलोत्तरो
नभः श्रितं तत्पदिको बलं द्विषाम् ।
ततिं क्षितिस्थामनुजो जघान च
द्रवत्तुरङ्गामतिदन्तवद्विभुम् ॥ २८ ॥
युधि द्विपा रामशरेण दारिताः
कृतत्वराधोरणमुक्तकन्धराः ।
यतो धरण्यामनुकृष्टवारिदं
दिवः पतन्तो रुरुजुः स्वसैनिकान् ॥ २९ ॥

---

25. D. Fr. पवनस्य रंहसा for पवनेन रंहस .

26 D Fr प्रतिबिम्बविग्रहं for प्रतिबिम्बविग्रहं Fr प्रयुध्यतां for विगृह्णतां

28. D Fr read the following for our text —चकार लक्ष्यं स नभः श्रितं बलं बलोत्तरोऽपि प्रथमोऽनुजो द्विषाम् । द्रवत्तुरंगामतिदन्तवद्विभुं जघान पंक्ति पदिकः क्षितिस्थिताम् Agreeing with the Sinhalese edition. A अभिद्रान्तवत्, B. अतिदान्तवत्, C अभिदन्तवत् for अतिदन्तवत्

29. D Fr. विभिदु for रुरुजु.

शरासने वर्त्मनि लक्ष्यभेदने
परैरुपालक्ष्यत नेषुसन्ततिः ।
ऋतेऽपि हेतोरिव दीर्णवक्षसो
निपेतुरस्य प्रधने सुरद्विषः ॥ ३० ॥

यथा गुणस्य ध्वनयः समुद्ययु-
र्निपातशब्देन समं युधि द्विषाम् ।
तथाऽस्य योद्धुर्धनुषो विनिर्गता
जवे विशेषं विदधुः शिलीमुखाः ॥ ३१ ॥

सुरारिहस्तच्युतशस्त्रजालका-
न्यलब्धलक्ष्याणि चिरं नभस्तले ।
विशुष्कपत्रप्रतिमानि तच्छर-
प्रतानवातोपहतानि बभ्रमुः ॥ ३२ ॥

प्रभञ्जनेनाहितपक्षतिध्वनि
प्रसर्पतां राजसुतस्य पत्रिणाम् ।
ऋजुद्विषस्ते प्रतिलोममाहृतैः
शरैर्निजैरेव दृढं निजघ्निरे ॥ ३३ ॥

क्षतं पृषत्केन पतत्रिणां पथः
पतद्बलं तत्तनयस्य भभतः ।
निपातखेदादशिवे भुवस्तले
भियेव तूर्णं जहुरन्तरासवः ॥ ३४ ॥

---

30 Fr. लक्षलेदने for लक्ष्यभेदने. D. Fr. शीर्णवक्षस for दीर्णवक्षस

31 D Fr निदधु for विदधु.

32. D Fr °पाणिच्युत° for °हस्तच्युत° Fr. °लक्षाणि for °लक्ष्याणि

33. D प्रसर्पता राजसुतस्य पत्रिणा for प्रसर्पतां राजसुतस्य पत्रिणाम्. A C. क्रतुद्विष for ऋजुद्विष Agreeing with the Sinhalese edition.

34 D. Fr महीतले for भुवस्तले.

सिताङ्कुशन्यासविधूतमस्तकाः
शिरःसमीपे विनिविष्टबाहवः ।
ध्रुवं नदन्तो युधि तं प्रहारिणं
भयादयाचन्त यथारिदन्तिनः ॥ ३५ ॥

द्विपं करीरीयुगमूलखण्डित-
प्रशीर्णदन्तं समदेन पश्यता ।
मृधावतारव्यथितेन चेतसि
क्षणं विचक्रे निकटेन दन्तिना ॥ ३६ ॥

करी करं यातमुदग्रविग्रहः
परं प्रहर्तुं प्रतिहृत्य रंहसा ।
शरेण भित्त्वा निखिले निकीलिते
शशाक भोक्तुं न भुजस्थ मण्डले ॥ ३७ ॥

निकीलिते रामशरेण वेगिना
दृढं विभिद्योरुयुगं तुरङ्गमे ।
कृतेऽपि दोषे भयमूढवृत्तिना
हयेन कश्चिद्विचचाल नासनात् ॥ ३८ ॥

रिपोरपूर्णेन्दुमुखेन कश्चन
स्थिरासनः पत्रियुगेन राक्षसः ।
निकृत्तयोरप्यधिजानु पादयोः
पपात वेगेन यतो न वाजिनः ॥ ३९ ॥

---

35. C. इवारिदन्तिन· for यथारिदन्तिन .

36 C प्रकीर्णदन्तं for प्रशीर्णदन्तं. D रमरावतार° for मृधावतार ° Agreeing with the Sinhalese edition.

38. D कृतेऽपरावेऽपि भयेन चेतसा for कृतेऽपि दोषे भयमूढवृत्तिना.

39. D अरे for रिपो·.

वधाय धावन्नभिशत्रु विद्विषः
शरेण कृत्तच्युतमस्तकोऽपरः ।
हतायुरप्यादिकृतेन कानिचि-
त्पदानि वेगेन जगाम राक्षस. ॥ ४० ॥

जवेन कश्चिज्जवनाम्बुदोपम
क्षणं सिताभ्रैः कृतकर्णचामरम् ।
निपत्य कुम्भे तरसा द्विधा गतै-
र्विहायसा वाहयति स्म दन्तिनम् ॥ ४१ ॥

पृषत्कभिन्नोदररन्ध्रनिर्गतं
स्वमन्त्रमुत्कृत्य खुराग्रपातनैः ।
दिशि क्षिपन्तं युधि वेगधारया-
परो भुवं वाहयति स्म वाजिनम् ॥ ४२ ॥

निकृत्य सौमित्ररथाङ्गधारया-
पवर्जितं स्वं तरसा क्षपाचरः ।
क्रुधायुधीकृत्य भुजं महीभुजः
सुतं जघान ध्वनिकम्पिताचलः ॥ ४३ ॥

न्यमज्जदर्धेन रथाङ्गमीरितं
परेण शत्रोरुपदण्डमस्तकम् ।
तमेव दण्डं परशुं विधाय तं
शिरस्यरातिर्निजघान सस्वनः ॥ ४४ ॥

---

40. D. गतायु for हतायुः C. नैर्ऋत, D. कौणप for राक्षस.

41. B हस्तिनम् for दन्तिनम्

42. C. सैन्धवं, D. घोटकं for वाजिनम्.

43. D कृधा for क्रुधा D's reading appears to be corrupt. C D कम्पितस्थल for °कम्पिताचल. Agreeing with the Calcutta edition.

स्वपाणियंत्रच्युतशस्त्रसादितं
विधाय वृन्दं बहुधा सुरद्विषाम् ।
रणाय कोशादसिमीशितुः सुत-
श्चकर्ष कृष्णं विवरादिवोरगम् ॥ ४५ ॥

परस्य सौमित्रिकृपाणपाटित-
द्विधाभवद्देहभृतो निकीलयन् ।
शरेण पार्श्वे नृहरिः समग्रतां
व्यधत्त रोषेण नु लीलया नु सः ॥ ४६ ॥

करं रणाय प्रतिहृत्य धावति
द्विषे निजघ्ने तनयेन भूभुजः ।
बहूनि खण्डानि विधित्सुनासिना
समेत्य संपिण्डित एव तत्करः ॥ ४७ ॥

कृपाणकृत्तस्य दृढोरुयन्त्रितं
न पश्चिमार्धं निपपात सादिनः ।
तुरङ्गवल्गाद्दढकृष्टमुष्टिना
परेण भागेन च लम्बितं पुरः ॥ ४८ ॥

परेण खड्गेऽनुपपातपातिते
सुरारिरुत्तानविसृष्टविग्रहः ।
अपि व्यपाये सति सत्त्वमानयो-
र्द्विषे न दित्सन्निव पृष्ठमाहवे ॥ ४९ ॥

---

45. D. वृन्दं for वृन्दं Agreeing with the Sinhalese edition.

48 D °वाल्गाद्दढकृत्तमुष्टिना, Fr. °वल्गाद्दढलग्नमुष्टिना for °वल्गाद्दढकृष्टमुष्टिना Fr. agreeing with the Sinhalese edition.

निमग्नखड्गे जठरे सुरद्विषः
परिक्षरच्छोणितसिक्तमूर्तयः ।
परस्परस्य प्रसभं समुच्छ्वस-
त्प्रहारवातेन पुनर्विशोषिताः ॥ ५० ॥

ततस्ततासृक्स्रवलोहिताम्बरः
श्रियं जयस्थामुपयन्तुमुद्यतः ।
यथेप्सपानाशनतृप्तचेतस-
श्चकार राजन्यवरश्चिरं द्विजान् ॥ ५१ ॥

ततो मरुत्पावकशस्त्रनिर्धुत-
प्रदग्धमारीचसुबाहुविग्रहः ।
बलं बलीयानबलीकृतं भिया
ततं दिगन्तं स निनाय नायकः ॥ ५२ ॥

रणे दधानो हृदयं दयाऽहृतं
सलीलमायम्य धनुर्धनुर्धरः ।
पराङ्खानां शनकः शिलीमुखा-
द्विषद्विपानां जघने जघान सः ॥ ५३ ॥

भृशं न सेहे युधि राममाशुग-
प्रतानशुष्काशनिपातभीषणम्
युगान्ततिग्मद्युतितेजस द्विषो
बलीयसो भ्रातृबलान्वितं बलम् ॥ ५४ ॥

---

50 D सुरारय. for सुरद्विष D. परिस्रवल्लोहित° for परिक्षरच्छोणित°.

51 A, B जयोत्थां for जयस्थां D °पानासन° for °पानाशन°. D. agreeing with the Sinhalese edition. D. Fr. खगान् for द्विजान्.

52 C. क्षणाद्दिगन्तं for ततं दिगन्तं.

53. D आहृत्य for आयम्य.

24. C चिरं for भृशं D. °प्रवृन्द° for °प्रतान°.

स्थित्वा गुण महति तत्क्षणलब्धमोक्षाः
सुश्लिष्टयुक्तिसफलाननसंपदस्ते ।
शाक्या इवास्य विशिखा रिपुसैनिकेभ्य-
श्चक्रस्त्रिविष्टपसभागमनोपदेशम् ॥ ५५ ॥

हुतभुजि निधनाख्ये शत्रुहव्यानि हुत्वा
परिणयति जयश्रीवीरकन्यां नृवीरे ।
समरपटहघोषे तत्र नर्त्तं कबन्धै-
र्बहलरुधिरपङ्कस्फारिसिन्दूरलेपैः ॥ ५६ ॥

मध्येनिकृत्तरजनीचरपूर्वकाया-
श्छेदैः स्थिता भुवि निपत्य भयं वितेनुः ।
रक्षःसु युद्धविमुखेषु विभिद्य भूमी-
मर्धोत्थिता इव पुनः समराय दैत्याः ॥ ५७ ॥

रामायुधव्यथितराक्षसरक्तधारा-
स्पर्शेन लोहितरुचो मुहुरम्बुवाहाः ।
गौरीपतिप्रणतिसंभ्रमलाभवन्ध्यां
सन्ध्यामकालघटितां गगने वितेनुः ॥ ५८ ॥

संक्रीडद्रथतुरगद्विपाभ्रवृन्द-
व्युत्क्रान्तौ विरतपृषत्कपातवृष्टि ।
निस्त्रिंशस्फुरिततडिद्वियुक्तमाप
व्यक्तार्कद्युति शरदीव तन्नभः श्रीः ॥ ५९ ॥

---

55. A. B C त्रिपिष्टपसभा° for त्रिविष्टपसभा°.

56. D. °पटहकोषे for °पटहघोषे C. नृत्यं for नृत्तं D कदन्धै for कबन्धै

57. D निशम्य for निपत्य D. गोत्रां, Fr पृथ्वीं for भूमी. C प्रधनाय for समराय.

58 D. रोहितरुच for लोहितरुच D °बन्ध्यां for °वन्ध्यां.

59. D. °बृन्द for °वृन्द.

रक्षोवसापिशितपूरितकुक्षिरन्ध्रः
काकुत्स्थबाणहतहास्तिमुखाधिरूढः ।
पर्यन्तलग्नरुधिराणि मृदुप्रणाद-
स्तुण्डानि वायसगणो रदने ममार्ज ॥ ६० ॥

राजात्मजौ मुनिसुताश्रुभिराहिताघ्र्यौ
प्रत्युद्गतौ मृगकुलैरटजानि गत्वा ।
आवर्जिते विदधतुः शिरसी सुबाहो-
र्बाणव्रजेन गुरुणी गुरुपादमूले ॥ ६१ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य कृतौ मारीचसुबाहुवधो नाम पञ्चमः सर्गः ॥

---

60. C. 'मुखावरूढ. for मुखाधिरूढ·.

61. C D. मुनिसुताक्षिभि for मुनिसुताश्रुभि. A. B. आहिनार्घौ for आहिताघ्र्यौ.

षष्ठः सर्गः ।

उच्चचाल ततः स्रष्टा जगदंशस्य मैथिलम् ।
अनुग्रहीतुमग्र्यं गृहिणामाहितक्रतुम् ॥ १ ॥
बिभ्रत् सन्ध्याविधिस्नानसंवर्धितरुचो जटाः ।
ज्वाला इव तपोवह्नेः शालिशूकाग्रपिङ्गलाः ॥ २ ॥
तेजसा तपसो दीप्तः स्निग्धश्च करुणागुणात् ।
समं संदर्शितादित्यचन्द्रोदय इवार्णवः ॥ ३ ॥
शिरःप्रदेशलम्बिन्या कुर्वन् रुद्राक्षमालया ।
फलिता इव तीर्थाम्भःसेकपुष्ट्या जटालताः ॥ ४ ॥
अरण्यदेवताभिः स प्रयुक्तबलिमङ्गलः ।
व्रती निरगमत् सत्रान्मेघाद्रुध्न इव ज्वलन् ॥ ५ ॥
निनाय हरिणव्रातं स्वयं यत्नेन वर्धितम् ।
प्रस्थितं सह संरुध्य बाष्पापूरितलोचनौ ॥ ६ ॥
गमनव्याहृतारम्भप्रणामेषु महर्षिभिः ।
पाणिभिः शिरसि स्पृष्टौ हव्यधूमसुगन्धिभिः ॥ ७ ॥
वैखानसवधूहस्तलम्भितार्घ्यकृताशिषौ ।
तौ द्रष्टुकामौ मेदिन्या ईश्वरस्य सुतौ धनुः ॥ ८ ॥

---

1. D उच्चचार for उच्चचाल D कर्ता for स्रष्टा.

3. D. तपसस्तेजसा for तेजसा तपसः.

5. D अरण्यदेवताभिश्च for अरण्यदेवताभि स. C मुनि for व्रती

6. C. D. read सह प्रस्थितमारुध्य वर्धितं हरिणव्रजम् । स्वयं निनाय यत्नेन बाष्पापूरितलोचनौ for our text B. बाष्पापूरितलोचनौ for बाष्पापूरितलोचनौ

7. D. शिरसि पाणिभि स्पृष्टौ for पाणिभि शिरसि स्पृष्टौ.

8. C D. °लम्भितार्घ° for °लम्भितार्घ्य ° C. D. द्रष्टुकामौ निनायैशं मेदिनीश-सुतौ धनु. for तौ द्रष्टुकामौ मेदिन्या ईश्वरस्य सुतौ धनु.. Agreeing with the Sinhalese edition.

ततश्चिरपरित्यक्तं गौतमस्य तमोनुदः ।
विवेश विश्वभुग्धाम्नो धाम वर्त्मवशाद्वशी ॥ ९ ॥
स्थण्डिलासु कुटीरस्य निकटाङ्गनभूमिषु ।
प्रस्तृतदर्भसन्दर्भघासग्रासोद्यतद्विपम् ॥ १० ॥
क्वचिदुद्देहिकालीढजीर्णवल्कलमन्यतः ।
आरण्यतुटुमच्छिन्नशीर्णकृष्णमृगाजिनम् ॥ ११ ॥
तलस्थितजरत्कुम्भमुखान्निर्गच्छताहिना ।
आवर्जितपयास्तिम्यद्वृक्षमूलमिव क्वचित् ॥ १२ ॥
क्वचिद्विष्णुप्रतिच्छन्दःकुक्षिस्थविवराननात् ।
नकुलैरन्त्रवत्कृष्टवेष्टमानसरीसृपम् ॥ १३ ॥
तस्मिन्निजपदस्पर्शत्याजितग्रावविग्रहम् ।
पप्रच्छ स्त्रीमयं तेजो रामः शापस्य संभवम् ॥ १४ ॥
निगद्यासौ सुनासीरं व्रीडानम्रीकृताननां ।
न्यवीविददनुक्त्वैव यौवनाविनयं पुरा ॥ १५ ॥
ययौ रामोऽथ तं देशं मरुतामास वेगिनाम् ।
पुरुहूतहतभ्रूणच्छेदेभ्यो यत्र संभवः ॥ १६ ॥

---

9. A. B. गोतमस्य for गौतमस्य.

10. C D निकटाङ्गणभूमिषु for निकटाङ्गनभूमिषु. Agreeing with the Sinhalese edition.

14. D शापस्य स्त्रीमयं तेजो राम पप्रच्छ संभवम् for पप्रच्छ स्त्रीमयं तेजो राम शापस्य संभवम् Agreeing with the Sinhalese editin.

15. B. शुनाशीरं, C शुनाशीरं, Fr सुनाशीरं for सुनासीरं. A. D. निगद्यासौ सुनासीरं व्रीडादावर्जितानना for निगद्यासौ सुनासीरं व्रीडानम्रीकृतानना. A. D agree with the Sinhalese edition. D. Fr न्यवीवदत् for न्यवीविदत्.

16. A मेघातिथिहतभ्रूणच्छेदेभ्यो यत्र संभव । मरुतां वेगिनामास देशं रामो ययावथ, B मेघातिथिहतभ्रूणच्छेदेभ्यो यत्र संभव । ययौ रामोऽथ तं देशं मरुतामास वेगिनाम्, C मध्वरातिहतभ्रूणच्छेदेभ्यो यत्र संभव । मरुतां वेगिनामास देशं रामो ययावथ for our text. C. agrees with the Sinhalese edition.

प्रतीत्या लङ्घिताध्वानस्ते तोरणमणित्विषा ।
इति चेतोहरा राममभिव्यातेनिरे गिरः ॥ १७ ॥
मत्तमातङ्गसंदानदामनिर्दलितत्वचः ।
अजय्यत्वं वदन्तीव यस्य पर्यन्तभूरुहः ॥ १८ ॥
ताराव्रजस्पृशो याति पिधानत्वं निशाकरः ।
यत्र प्राकारचक्रस्य नभोमध्यस्थमण्डलः ॥ १९ ॥
मध्ये कुवलयाक्रान्तमहापद्मविभषणः ।
अवतीर्णघनालिश्रीर्यत्खातः सागरायते ॥ २० ॥
वप्राजगरभोगेन वेष्टचमानः समन्ततः ।
पिण्डीभूत इव त्रासाद्धनो यद्गृहसंचयः ॥ २१ ॥
यद्गोपुरविटङ्काग्रचन्द्रकान्तमणिस्रवम् ।
रसयन्ति स्यदश्रान्ताः शीतदीधितिवाजिनः ॥ २२ ॥
विटङ्कभुजसंप्राप्तसहस्रकरमूर्तिना ।
विग्रहेण यदावाससंतानो भार्गवायते ॥ २३ ॥
यद्देवगृहशृङ्गस्थपद्मरागप्रभाहतम् ।
व्योममध्यं प्रपद्यापि बिम्बं बालायते रवेः ॥ २४ ॥
हर्म्यशृङ्गेषु निर्धूतध्वान्ता यत्र मणित्विषः ।
ज्यौत्स्नः कृष्ण इति ज्ञानं जने रुन्धन्ति पक्षयोः ॥ २५ ॥
यत्र वातायनासन्नवारमुख्यामुखेन्दवः ।
रथ्यासंचारिणो यूनः स्खलयन्ति पदे पदे ॥ २६ ॥

---

18 Fr. निर्दालित° for निर्दलित° The reading of the Mss. Fr appears to be corrupt; it agrees with the Sinhalese edition.

21. D Fr. वेष्टमान. for वेष्टचमान. A. B. C. agree with the Sinhalese edition.

24 D. Fr. विम्बं for बिम्बं

26. D. Fr. °द्वारमुख्या मुखेन्दव. for °वारमुख्यामुखेन्दव°. D. Fr. रथ्यां संचारिण for रथ्यासंचारिण..

श्रुत्वा यत्सौधपृष्ठेषु विमानशिखिनिस्वनम् ।
याति शैथिल्यमुष्णांशुहयभोगीन्द्रबन्धनम् ॥ २७ ॥
सोपानरत्ननिर्भिन्नतमश्छेदेन दर्शिताः ।
ग्लायन्ति यत्र न सरश्चक्रवाका निशास्वपि ॥ २८ ॥
यस्य हर्म्यसमासन्नतिग्मदीधितिवाजिनः ।
मन्दं व्रजन्ति संगीतवीणावर्जितचेतसः ॥ २९ ॥
पौरसन्दोहभोगस्य श्रिया वज्रभृतः पुरीम् ।
अधो विधत्ते धामेदं मैथिलस्य पुरं परम् ॥ ३० ॥
इति व्याहरतैवाथ तेन स्थानं महीयसः ।
परमृद्धं क्रतुपतेर्निन्याते नेतुरात्मजौ ॥ ३१ ॥
कृतपाद्यो भुवो भर्तुः स व्रती प्रमदाश्रुभिः ।
विष्टरं परिजग्राह सिंहचर्मोत्तरच्छदम् ॥ ३२ ॥
स्तुत्यास्तुतीवलं सत्रे जगादोत्साहयन्मुनिः ।
नुतिर्भ्राजत एवाग्रे निःस्पृहेण प्रभोरपि ॥ ३३ ॥
यो धर्मस्य धृतः सप्ततन्तुभिः सगरादिभिः ।
तन्तुः स एव सम्राजा सम्यगालम्बितस्त्वया ॥ ३४ ॥

27. D. Fr. यानस्य for विमान °

28. D. Fr. म्लायन्ति for ग्लायन्ति D. Fr. क्षपास्वपि for निशास्वपि

29. B. C. संगीतवाद्यावर्जित° for सगीतवीणावर्जित °

32. D. Fr. व्याघ्रचर्मोत्तरच्छदम् for सिंहचर्मोत्तरच्छदम्.

33. B. reads जगादोत्साहयन् सत्रे मुनि स्तुत्यास्तुतीवलम् । नुतिर्भ्राजत एवाग्रे निस्पृहेण प्रभोरपि, C. has स्तुत्यास्तुतीवलं सत्रे जगादोत्साहयन्मुनि । प्रभोर्भ्राजत एवाग्रे नि स्पृहेण कृता नुति, D. reads स्तुत्यास्तुतीवलं सत्रे जगादोत्साहयन्मुनि । प्रभोर्भ्राजत एवाग्रे नि स्पृहेणापि हि स्तुति for our text. B agrees with the Sinhalese edition.

34. C. D. read तन्तुर्धर्मस्य य सप्ततन्तुभि सगरादिभि । धृत स एव सम्राजा सम्यगालम्बितस्त्वया C. D. agree with the Sinhalese edition.

अपि सत्यां विस्रसायामविस्रस्तां तव श्रियम् ।
विक्रमस्य वदन्तीव सत्रसंभारसंपदः ॥ ३५ ॥

कृतवेलाव्यतिक्रान्तिस्त्वरासंकोचिताम्बरा ।
साभिसारेव ते कीर्तिर्दूरमाक्रामदाशया ॥ ३६ ॥

कच्चित्स्वार्थे क्रतुरयं स्वर्ग्यस्तव फलस्पृहाम् ।
विनैव प्रथते कच्चिन्निःस्वं प्रति वदान्यता ॥ ३७ ॥

आदाय करमाढ्येभ्यः कीकटेष्वपि वर्षसि ।
प्रपीय वारि सिन्धुभ्यः स्थलेष्विव घनाघनः ॥ ३८ ॥

नवे वयसि राज्यार्थं प्रविधाय जरां गतान् ।
कच्चित्पुष्णासि ते भृत्यान् सादरं समयेऽक्षमे ॥ ३९ ॥

त्वद्विक्रमेण वैधव्यं प्रापिता रिपुयोषितः ।
बालप्राणार्थिनीः कच्चित्मम्यग्रक्षसि बन्धुवत् ॥ ४० ॥

द्वयेनादौ त्रिवर्गस्य कच्चित्साम्यं गतश्चिरम् ।
धर्मोऽद्य वयसो वृध्द्या सह संवर्धते तव ॥ ४१ ॥

इति प्रश्नावकाशस्य विरामे रामलक्ष्मणौ ।
मुनेर्विवेद वैदेहो द्रष्टुकामौ निजं धनुः ॥ ४२ ॥

---

35 D. reads the following for our text —विस्रसायामविस्रस्तां विक्रमस्य तव श्रियम् । सत्यामपि वदन्तीव सत्रसंभारसंपद D agrees with the Sinhalese edition.

37. D स्वार्थे कच्चित्क्रतुरयं for कच्चित्स्वार्थे क्रतुरयं D वदन्यता for वदान्यता

38 C द्ररिद्रेषु for कीकटेषु C निपीय for प्रपीय

39 D भृत्यानपि सादरमक्षमे for भृत्यान्सादरं समयेऽक्षमे D agrees with the Sinhalese edition.

40. C. वैरियोषित for रिपुयोषित . C पुत्रप्राणार्थिनी , D. शिशुप्राणार्थिनी for बालप्राणार्थिनी

एकमुद्रेचितं तस्य भ्रूचापमनुजीविभिः ।
चापस्यानयने हेतुः क्षणमास क्षमापतेः ॥ ४३ ॥
वरवक्त्रेन्दुबिम्बत्विड्ग्रासगृध्नुं परं ग्रहम् ।
सीताविवाहसंयोगसुखरोधार्गलान्तरम् ॥ ४४ ॥
अहिर्बुध्न्य परित्यागतीव्रशोकभरादिव ।
मध्ये लोहसमुद्गस्य निःशब्दं शयितं चिरम् ॥ ४५ ॥
अमार्दवमतिस्तब्धं गुणेनापि न नामितम् ।
इशेन दर्शितस्नेहं नीचं जनमिवाग्रहम् ॥ ४६ ॥
चक्रीचकार कर्णान्तावतंसितनखद्युतिः ।
तदाशरथिरादाय सीताक्रयधनं धनुः ॥ ४७ ॥
ततस्त्रासकरो नादश्चापभङ्गसमुद्भवः ।
दिशः ससर्प रामस्य यशोद्घोषणडिण्डिमः ॥ ४८ ॥
क्षेत्रभूमिर्गुणस्यासौ सीतया सहिता वृता ।
वप्रः फलवती सद्यः प्रचकम्पेऽखिला पुरी ॥ ४९ ॥
रोमोद्भेदापदेशेन हर्षमङ्कुरितं हृदि ।
सिञ्चन्नश्रुस्रवेण स्म मुनिमाह महीपतिः ॥ ५० ॥

---

43 D तस्योद्रेचितमेवैकं for एकमुद्रेचितं तस्य D. agrees with the Sinhalese edition

44 D. °विम्ब° for °बिम्ब° D °गृध्नुपरग्रहम for °गृध्नुं परं ग्रहम्

45. C. अहिर्बुध्न्र°, D. अहिर्ब्रध्न° for अहिर्बुध्न्य°.

46. C. D जनं नीचमिवाग्रहम् for नीचं जनमिवाग्रहम् (' D. agreeing with the Sinhalese edition

47. C. सीताक्रयधनं दाशरथिरादाय तद्धनु for तदाशरथिरादाय सीताक्रयधनं धनु C agrees with the Sinhalese edition

48 C. यशोयात्रिकडिण्डिम for यशोद्घोषणडिण्डिम

50 C मुनिमश्रुस्रवेण स्म सिञ्चन्नाह महीपति . D सिञ्चन्नश्रुस्रवेण स्म मुनिमाह विशापति for सिञ्चन्नश्रुस्रवेण स्म मुनिमाह महीपति . C agrees with the Sinhalese edition.

प्रौढेऽपि वयसि प्रायो रुणद्धि तपसि स्पृहाम् ।
यच्चापभङ्गदेयं मे प्राणैः सीमन्तिनीधनम् ॥ ५१ ॥

तद्रामस्य गतं दास्यं विक्रमक्रयलम्भितम् ।
अस्य द्रस्वद्वितीये मे न्यस्तां विध्यूर्मिलामपि ॥ ५२ ॥

शोकाख्यमस्य वैदेह्या विवाहपरिलम्बजम् ।
हृच्छल्यमस्तुकारेण तपस्यन् निचकर्ष सः ॥ ५३ ॥

अथ दूतास्थितः प्रायाद्राजद्वयमनोरथः ।
अयोध्यामन्यराजन्यप्रीतिप्रशमनो रथः ॥ ५४ ॥

यन्नासीद्रघुपतिरूपनिर्जितोऽसौ
वैलक्ष्यक्षतकृतसंमदावसादः ।
लालाट्यज्वलनरयेण भूतभर्त्रा
नैरात्म्यं हृदयभुवः शिवाय सृष्टम् ॥ ५५ ॥

पीनांसो नियतमुरस्तटो विशालः
क्षामं तव्ययति मध्यमं शरीरम् ।
धात्रेति स्वयमनुचिन्त्य लम्बबाहु-
स्तम्भाभ्यां दृढमिव यन्त्रितोऽस्य देहः ॥ ५६ ॥

---

51. C. reads the following for our text चापभङ्गेन यद्देयं प्राणैः सीमन्तिनीधनम् । प्रौढेऽपि वयसि प्रायो रुणद्धि तपसि स्पृहाम् C agrees with the Sinhalese edition.

52. C reads the follwing for our text गतं रामस्य दास्यं तद्विक्रमक्रयलम्भितम् । अस्य भ्रातृद्वितीये मे न्यस्तां विध्यूर्मिलामपि C. agreeing with the Sinhalese edition.

53 D दुःखाख्यं for शोकाख्यं D. जानक्या for वैदेह्या .

54 D तदा for अथ D प्रागात् for प्रायात्

55 C लालाटज्वलनलयेन. D लालाटज्वलनरयेण for लालाट्यज्वलनरयेण

नेत्रान्ताधरकरपल्लवप्रभाभि-
स्तेनोष्णद्युतिकरकुङ्कुमार्द्रलिप्तः ।
व्याकोशारुणवनजप्रभाविशेषो
निर्जित्याहित इव पादयोरधस्तात् ॥ ५७ ॥

ज्ञानं विलोचनमिति प्रथिते तदीये ।
नेत्रे उभे विमलवृत्तिगुणस्वभावे ।
एकं तयोः श्रुतिपथस्य समीपमात्रं
यातं प्रपन्नमखिलश्रुतिपारमन्यत् ॥ ५८ ॥

इत्थं वराश्रयकथेषु जनेषु सीतां
नम्रेण घर्मसलिलास्पदगण्डलेखा
तस्थौ मुखेन शशिनिर्मलदन्तकान्ति-
ज्योत्स्नानिषिक्तदशनच्छदपल्लवेन ॥ ५९ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेर्निशभूनाम्नः कुमारदासस्य
कृतौ मिथिलाप्रवेशो नाम षष्ठः सर्गः ॥

---

57. D व्याकोष° for व्याकोश
59 D °गण्डरेखा for °गण्डलेखा

सप्तमः सर्गः ।

ततो धरित्रीतनया गरीयः
सा शासनं प्राप्य गुरोरलङ्घ्यम् ।
स्थपत्यशुद्धान्तजनैः परीता
जगाम कर्तुं व्रतिनो नमस्याम् ॥ १ ॥

सुखेन नत्वा गजकुम्भनीन-
स्तनावकृष्टा चरणौ महर्षेः ।
तयैव भूयो भरमुद्वहन्ती
सपुत्रनाम प्रतिपद्य यत्नम् ॥ २ ॥

सत्यं यदस्याः प्रविभाव्यरागो
दृष्टिप्रवेकः खलु कृष्णवर्त्मा ।
स्नेहेरितं तद्धनदोपमस्य
धैर्येन्धनं तेन ददाह भर्तुः ॥ ३ ॥

विन्यस्तपीनस्तनहेमकुम्भा
स्वेदाम्बुभिस्तद्धृदयोपकार्या ।
मनोभुवस्तत्प्रथमप्रवेशे
सिक्तापि नो तत्र रजः शशाम ॥ ४ ॥

---

1 C. तत पृथिव्यास्तनया for ततो धरित्रीतनया D. reads the following for our text –स्थपत्यशुद्धान्तजनै परीता ततो धरित्रीतनया गरीय । सा शासनं प्राप्य गुरोरलंघ्यं जगाम कर्तु व्रतिनो नमस्याम् Agreeing with the Sinhalese edition

3 C. reads the first two lines thus —दृष्टिप्रवेक· प्रविभाव्यरागः सत्यं यदस्या· खलु कृष्णवर्त्मा C agrees with the Sinhalese edition. D. तस्य for तेन

4. C D स्वेदोम्बुभि for स्वेदाम्बुभि D सिक्ता च for सिक्तापि

तुष्टो नु भङ्गादविपन्नधान्नः
शैवस्य चापस्य सुबाहुशत्रुम् ।
स्मरस्तमालिङ्ग्य तया प्रयुक्त-
श्चक्रे विहस्तं नु विशालदृष्ट्या ॥ ५ ॥

विधातृमुख्यैरपि दृश्यरूपं
रूपं निरूप्यार्धनिरीक्षितेन ।
एवं स गुण्यो गणयाम्बभूव
भूम्ना मनस्वी मनसैव तस्याः ॥ ६ ॥

प्रसीद मैवं परिभूदखण्डं
ताराधिपं ते वदनामृतांशुः ।
इति प्रियायाः पतितेव पादे
तारातति[र्]प्रनखच्छलेन ॥ ७ ॥

कृष्टा नितान्तं कृशवृत्तिमध्यं
मास्म च्छिनच्छ्रोणिरिति प्रचिन्त्य
गुर्वीं तदूरुद्वयशातकौम्भ-
स्तम्भद्वयेनेव धता विधात्रा ॥ ८ ॥

तदस्तु सोष्मं कठिनं प्रकृत्या
तनोति तापं स्तनयोर्द्वयं यत् ।
मध्यस्तमप्येतदनिन्द्यवृत्ते-
र्वलित्रयं मां दहतीति चित्रम् ॥ ९ ॥

---

5 C has the following for the first two lines–चापस्य भङ्गाद-विपन्नधान्न शैवस्य तुष्टो नु सुबाहुशत्रुम् Agreeing with the Sinhalese editio

6· C has the following for the last two lines –तस्याः स गुण्यो गणयाञ्चकार एवं मनस्वी मनसैव भूम्ना.

7. D क्षमस्व for प्रसीद

8 A B C °शातकौम्भ°, D शातकुम्भ ° We with A B C

9. D. बलित्रयं for वलित्रयं

स्तनौ नु कुम्भप्रतिमौ सुदत्या
निःशेषवक्षस्तटबद्धबिम्बौ ।
पिण्डौ नु पीनौ नवयौवनस्य
न्यस्तौ शरीरादतिरिक्तवन्तौ ॥ १० ॥

विभाति तन्व्या नवरोमराजिः
शरीरजन्मानलधूमरेखा ।
अन्योन्यबाधिस्तनमण्डलस्य
मध्यस्य धात्रा विहितेव सीमा ॥ ११ ॥

यास्यङ्गदोऽप्येष विवृद्धदीप्ति-
रनङ्गदत्वं न्यसनेन यत्र ।
तथाहि शक्तिर्मदनस्य दाने ।
चारुप्रकोष्ठस्य भुजद्वयस्य ॥ १२ ॥

वक्त्रेन्दुलीलामनुयातुमस्याः
कलान्तराणि प्रतिपद्य चन्द्रः ।
पूर्णोऽपि साधर्म्यविशेषशून्यः
क्रमेण शोकादिव याति हानिम् ॥ १३ ॥

मृगाङ्गनानां नयनानि पूर्वं
विधाय नीलानि च नीरजानि ।
कृतप्रयोगेण पुनर्विधात्रा
सृष्टं नु नेत्रद्वयमायताक्ष्याः ॥ १४ ॥

---

10 D सुमुख्या for सुदत्या C D °बिम्बौ for °बिम्बौ.

11 C नवरोमराजी, D नवलोमराजि for नवरोमराजि C °धूमरेषा, D, धूम्र ले ग, Fr °धूमलेषा for °धूमरेखा

13. D अनुकर्तु for अनुयातुं C. सोम for चन्द्र C. दु.खादिव for शोकादिव

14 C. एणाङ्गनानां, D रुर्वङ्गनानां for मृगाङ्गनानां. B. निर्माय for विधाय. C. धृत° for कृत°. C. कृतं for सृष्टं

अन्वेति कान्त्या कमनीयमस्या
युग्मं भ्रुवोरायतनम्रलेखम् ।
रोषेण कृत्तस्य हरेण मध्ये
छेदद्वयं मन्मथकार्मुकस्य ॥ १५ ॥

असर्पतामापतितालकान्त-
पर्यन्तकान्ति श्रुतिमूलमस्याः ।
भ्रुवौ नु वक्तुं तरलत्वमक्ष्णो-
र्भ्रूयुग्मकौटिल्यमिमे नु दृष्टी ॥ १६ ॥

तन्व्या मनोज्ञस्वरनैपुणेन
विनिर्जितो रोपविलोहिताक्षः ।
प्रसक्तचिन्ताहितमन्यपुष्टः
शोकेन काष्ण्यं वहतीति मन्ये ॥ १७ ॥

पुष्पायुधः स्वात्मनि शस्त्रपातान्
कुर्वीत सीताकृति वीक्ष्य रत्नम् ।
चित्रीयते तन्न यदात्मयोने-
स्तीव्रा मयि व्यापृतिरायुधानाम् ॥ १८ ॥

सति स्म तस्यातिगुरुप्रतर्के
चेतस्यथ प्राह मुनिं नरेन्द्रः ।
प्रणम्य शुद्धान्तमुपैति पादौ
तीर्थादनूनौ भवतः स्नुषेति ॥ १९ ॥

---

15 C °रेखम्, D °लेपम् for °लेखम् C क्रोधेन for रोषेण. D भवेन for हरेण

17. D. कोप° for रोष°. D दु खेन for शोकेन.

कलत्रभारेण कुचद्वयस्य
स्थाम्ना तथा मन्थरविक्रमायाः ।
आसीत् स तस्या गतिमन्थरत्वेऽ
सौ राजपुत्रोऽपि तृतीयहेतुः ॥ २० ॥

अनुव्रजन्तं परिवारवर्गं
प्रव्याहरन्ती किल नाम किञ्चित् ।
तिर्यग्विवृत्ताननचन्द्रबिम्बा
रामं जघानार्धनिरीक्षितेन ॥ २१ ॥

तस्यां गतायां सह राघवाभ्यां
भर्ता भुवः संयमिनं ततस्तम् ।
द्रष्टुं निनाय स्वयमृद्धिसारं
सत्रस्य विप्रैरकृशं ततस्य ॥ २२ ॥

दूरोऽपि देहेन वियोगवह्नेः
प्रवर्धिताधिः स्फुटतीति भीतः ।
तद्रक्षणायैव कृतप्रयत्नो
मुमोच तस्या हृदयं न रामः ॥ २३ ॥

20, D. reads the last three lines thus —स्थाम्ना च तस्या गतिमन्थरत्वे । आसीत्तथा मन्थरविक्रमायास्तृतीयहेतु स हि राजपुत्र . Agreeing with the Sinhalese edition.

21. C. संव्याहरन्ती for प्रव्याहरन्ती D. °विम्बा for °बिम्बा

22. A. B. C. द्रष्टुं निनाय, D. Fr. निनाय द्रष्टुं. We with A. B. C. supported by the Calcutta edition.

23. C. D रामो न तस्या हृदयं मुमोच for मुमोच तस्या हृदयं न रामः.

याते च रामे नयनाभिरामे ।
दृष्ट्वा दिशः किं फलमस्ति शून्याः ।
इतीव पद्मायतलोचनाया
विलोचने नेत्रजलं रुरोध ॥ २४ ॥

कृतेऽपि पाणिग्रहणे मयेयं
जाता परत्राहितरागवृत्तिः ।
बालेति तस्या वलयं कृशाङ्ग्याः
ससर्ज रोषेण यथा कराग्रम् ॥ २५ ॥

संतापवद्भिर्हृदि सन्नताङ्ग्याः
कामाहितः खेदविलोहितेन ।
नेत्रद्वयेनेव बहिःप्रवृत्त-
ज्वालावलिः संविविदे सखीभिः ॥ २६ ॥

याता नु सा तानवमङ्गजाग्नि-
तप्ते चिरं तद्धृदये निवासात् ।
उत स्वकीये हृदि तं निविष्ट-
मूढ्वा तनुत्वं श्रमजं गता नु ॥ २७ ॥

दूरेऽपि रामः परिकल्पवृत्त्या
किं दृश्यतेऽस्मिन्नथ वा स्थितेऽपि ।
किं मे प्रवासः प्रतिभाति पापा-
दित्यास तस्या विविधो विकल्पः ॥ २८ ॥

---

24. D. Fr. read याते च दृष्ट्वा नयनाभिरामे । रामे दिश° किं फलमस्ति शून्याः for our text, Agreeing with the Sinhalese edition.

25 D. Fr. बाला for जाता. D. Fr. जातेति for बालेति

26 D. Fr. विवेद कामावहितः सखीभि for कामाहित. खेदविलोहितेन. D Fr. वहि प्रवृत्त° for बहि प्रवृत्त° D. Fr ज्वालावलि खेदविलोहितेन for ज्वालावलि संविविदे सखीभि . D Fr. agree with the Sinhalese edition.

28 D Fr वितर्क for विकल्प .

मृदुप्रवालास्तरणेऽपि तन्वी
शिलातले नैव धृतिं सिषेवे ।
असृक्स्रवार्द्रे शरतल्पमध्ये
सा पुष्पकेतोरिव वर्तमाना ॥ २९ ॥

तुषाररश्मेरुदयेऽपि तस्या
नेत्रोत्पलं नो मुकुलीबभूव ।
चन्द्रे मुखच्छद्मनि दीर्घकाल-
मभ्यासतो नु प्रियचिन्तया नु ॥ ३० ॥

ससीकरं गर्भदलं कदल्या
न्यस्तं नताङ्ग्या हृदये सखीभिः ।
बबन्ध भिन्नस्फटिकावदातं
पुष्पेषुबाणव्रणपट्टशोभाम् ॥ ३१ ॥

कस्यापि दृष्ट्या मयि यद्विरागः
स्वपादसेवाभिरतेऽपि तत्किम् ।
इतीव शैथिल्यमतानि तस्या
युग्मेन सन्नूपुरयोरमन्दम् ॥ ३२ ॥

सखीसमीपेऽपि सखेदवृत्ति-
श्चन्द्रातपैरप्यनुतापभाजा ।
देहेन वैदेहसुता निनाय
दिनानि दीना कतिचित्कथञ्चित् ॥ ३३ ॥

---

29. D शिलातलेनैव for शिलातले नैव.

31. D. Fr सशीकरं for ससीकरं D वधूभि for सखीभि D छिन्न° for भिन्न°. D. Fr. पुष्पेषुवाण° for पुष्पेषुबाण°.

32. D. reads the following for the last three lines, स्वपादसेवाभिरतेऽप्यभूत्किम् । युग्मेन तन्नूपुरयोरमन्दमितीव शैथिल्यमतानि तस्या . Agreeing with the Sinhalese edition

सार्धं द्विजैः पावनसोमपान-
निर्धूतपाप्मन्यथ सत्रनाथे ।
मखस्य कोटिं प्रकृतस्य मुख्ये
क्षितिक्षितामीयुषि वीतविघ्नम् ॥ ३४ ॥

जनाधिनाथः पुरुहूतकल्पः
समग्रशक्तिः सुतयुग्ममन्यत् ।
ततः समादाय सुमन्त्रमूतः
पुरं प्रपेदे जनकस्य राज्ञः ॥ ३५ ॥

क्षत्रस्य नक्षत्रमदोषदुष्टं
वैवाहिकं वाहितशत्रुवीरः ।
पुरोहितेनाभिहितं निशम्य
संपादयामास विधिं विधिज्ञः ॥ ३६ ॥

स्नातद्विजारूढमदद्विपेन्द्र-
स्कन्धस्थकार्तस्वरकुम्भपंक्त्या ।
नृपस्य धिष्ण्ये प्रकृते समन्ता-
दच्छेदवत्पावनतीर्थतोये ॥ ३७ ॥

रथ्योभयान्ताहितशातकुम्भ-
कुम्भस्थपङ्केरुहगन्धविद्धे ।
तिरोदधाने गगनं सुगन्धौ
कर्पूरकृष्णागरुसारधूपे ॥ ३८ ॥

---

35. B. लोकैकनाथ, C. प्रजाविनाथ for जनाविनाथ D समन्त्रमूत F1. सुमन्तुसूत for सुमन्त्रसूत

37. B °चामीकर°, C °जाम्बूनद° for °कार्तस्वर° D भूपस्य for नृपस्य. D F1 विष्ण्य for धिष्ण्ये

38 C, °शातकौम्भ° for °शातिकुम्भ° D गगणं for गगनं. D F1 °काला गुरु° for °कृष्णागरु°.

चरत्सु वन्द्याननिःसृतेषु
नरेन्द्रसूनोर्जयघोषणेषु ।
प्रभातशङ्खध्वनिबृंहितेषु
ध्वनत्सु तूर्येषु च मङ्गलाय ॥ ३९ ॥
लाजा जलं दर्भमिति प्रसक्त-
माविष्कृताम्रेडितशीघ्रनादे ।
आहूय संपादयतोऽपि भृत्यान्
प्रत्युद्व्रजत्याकुलभृत्यवर्गे ॥ ४० ॥
ज्ञातुं मुहुर्यामघटीजलस्य
वृत्तिं प्रयुक्ते नृपदासवृन्दे ।
धावत्युरोघातनिपातिताध्व-
मार्गस्थलोकेऽपि गतागताभ्याम् ॥ ४१ ॥
आसन्नभूतो महितो मुहूर्तः
किं स्थीयते तावदिति प्रगल्भम् ।
वृद्धेषु वंशद्वितयस्य धीरं
स्नानाय सद्यस्त्वरयत्सु राममू ॥ ४२ ॥
उच्चैर्भृतान्यस्वरमुच्चरत्सु
समं समाविष्कृतमङ्गलेषु ।
आपूरिताशेषककुब्मुखेषु
पटुप्रसक्तं पटहध्वनेषु ॥ ४३ ॥

---

39 D. Fr बन्द्या° for वन्द्या° B. C नृपेन्द्र° for नरेन्द्र°. D. Fr. बृंहितेषु for बृंहितेषु. B. C. मङ्गलार्थे for मङ्गलाय.

40 D. Fr. °तूर्ण° for °शीघ्र° D. Fr. दासान् for भृत्यान्.

41 B. परिवारवृन्दे, C. परिवारलोके, D. नृपभृत्यवृन्दे for नृपदासवृन्दे.

42 A. वीरं for धीरं.

43. D. Fr. ककुम्मुखेषु for ककुब्मुखेषु A. B. पटुप्रणादं for पटुप्रसक्तं

वेत्रेण वेत्रग्रहणाधिकारे
जने च तत्रानुपयोगवन्ति।
दिदृक्षुवृन्दानि निरस्यमाने
मुखेन हुङ्कारकृता नितान्तम् ॥ ४४ ॥

हुङ्कारमात्रप्रथितैरमर्षै-
स्तिर्यक्कराग्रस्य विकम्पितेन।
निवारयन्तो मुखरं जनौघं
माशब्दिका वेश्मनि तत्र चेरुः ॥ ४५ ॥

केचिद्विधातुं विधिमुद्यतेभ्यः
क्रियासु दक्षाः कुशलेतरेभ्यः।
आच्छिद्य वैवाहिककर्मयोग्य-
वस्तूनि भृत्या विदधुर्विधानम् ॥ ४६ ॥

शच्या विवाहस्य विधानमार्द्यं
नामान्तरेण प्रथितं विधिज्ञः।
पर्यस्य चित्तानि तथा सुताया
नृपस्य तत्रैव जनस्ततान ॥ ४७ ॥

---

44. C. हुङ्कारवता for हुङ्कारकृता.

45 C. हंकारमात्रोपचितै for हुंकारमात्रप्रथितै C. व्यपोहयन्त for निवारयन्त. D Fr माशाब्दिका for माशब्दिका.

46. D Fr. read the first two lines —क्रियासु दक्षा विधिमुद्यतेभ्य ॥ केचिद्विधातुं कुशलेतरेभ्य·. Agreeing with the Sinhalese edition.

47. D. सच्या for शच्याः.

स्नानस्य रत्नाभरणेन दीप्त-
माकल्पमन्ते विधिवद्विधाय ।
ययौ वधूर्वेदविदा कृतार्घ्यं
वेद्या उपान्तं विधुरा स्मरेण ॥ ४८ ॥

अथोपनिन्ये नयकोविदेन
महेन्द्रसख्यास्तनुजेन तन्वी ।
लज्जाविधेया विधवेतराभि-
र्विभूषिताऽसौ विभुनन्दनाय ॥ ४९ ॥

समाददे संमदभिन्नधैर्यः
पाणिं फणीन्द्राङ्गगुरुप्रकोष्ठः ।
तस्याः कुमारः सुकुमारसन्धि
वामेतरं वामविलोचनायाः ॥ ५० ॥

प्राज्यं ततः प्राज्ञतरेण हव्य-
मावर्जितं वर्जितदुष्कृतेन ।
विधातृधाम्ना विधिवत्कृशानौ
सदिन्धने शीलधनेन तेन ॥ ५१ ॥

---

48. C has the following for our text :—आकल्पमन्ते विधिवद्विधाय स्नानस्य रत्नाभरणेन दीप्तं । ययावुपान्तं विधुरा स्मरेण वेद्या वधूर्वेदविदा कृतार्घ्यं D Fr. कृतार्घं for कृतार्घ्यं

49. B. रघुनन्दनाय for विभुनन्दनाय.

51. C reads the following for our text —आवर्जितं वर्जितदुष्कृतेन सदिन्धने शीलधनेन तेन । विधातृधाम्ना विधिवत्कृशानौ प्राज्यं तत प्राज्ञतरेण हव्यम् ॥ Agreeing with the Sinhalese edition.

वेद्यामनंसीदनवद्यवृत्ति-
स्तन्वी ततो वेदविदा प्रयुक्ता ।
प्रदक्षिणीकृत्य विवाहसाक्षी-
कृतं कृशानुं सह राघवेण ॥ ५२ ॥

गण्डस्य बिम्बं दुहितुर्धरित्र्या
घर्माम्भसां बिन्दुरलञ्चकार ।
चेतःस्थकन्दर्पकृशानुना वा
तस्योष्मणा वा परमार्थवहेः ॥ ५३ ॥

चकार चक्राङ्कतलेन पाणौ
करेण भर्त्राभिनिपीड्यमाने ।
सीत्कारमाकुञ्चितदीर्घदृष्टिः
स्पर्शेन वहेः किल नाम सीता ॥ ५४ ॥

व्यापारिता वाङ्मयपारगेण
द्विजेन तेन द्विजराजवक्त्रा ।
बाला कृशानौ कृशगात्रयष्टि-
र्भीवानभिज्ञाथ जुहाव लाजान् ॥ ५५ ॥

पत्युः करस्पर्शकृते कृशाङ्ग्या
हर्षे सखीभिः प्रविभाव्यमाने ।
आचारधूमागमलब्धजन्मा-
न्यश्रूणि तत्संवृतये बभूवुः ॥ ५६ ॥

---

52. B. नियुक्ता for प्रयुक्ता.
53. D. Fr. धरिण्या. for धरित्र्या . D. Fr स्वेदाम्भसां for घर्माम्भसां.
54. D. Fr शीत्कार° for सीत्कार°.
55. C. तन्वी for बाला.
56. A. B. C. तत्संवरणाय जग्मु. for तत्संवृत्तये बभूवु°.

कृत्वा नमस्यामनुपूर्वमुक्तो
भर्तुर्भुवो विप्रवरेण रामः ।
समेतजानिर्जनकस्य राज्ञो
वन्दिस्तुतस्यांघ्रियुगं ववन्दे ॥ ५७ ॥

पश्यन्सुतं पाशभृतो दधानं
गङ्गाकरासक्तकरस्य कान्तिम् ।
तस्थौ नृपः स्तब्धविशालदृष्टि-
रश्रुस्रवाक्षालितपक्ष्मरेखः ॥ ५८ ॥

रत्नासनस्थामथ पौरमुख्या
बाष्पप्रकाशप्रणयाः प्रणेमुः ।
भर्तुः सुतामेत्य वरं च तस्याः
कक्षान्तरे दत्तसितातपत्रम् ॥ ५९ ॥

नीत्वा विवाहोत्सवसंभृतेन
सुखेन रामः कतिचिद्दिनानि ।
ततः कदाचित्समयावबोध-
दक्षेण विद्धो हृदि मन्मथेन ॥ ६० ॥

गौरीमिवाचारगुणेनगुर्वीं
करे गृहीत्वा करभोपमोरूम् ।
सतल्पभूभागमनल्पशोभं
भवप्रभावो भवनं विवेश ॥ ६१ ॥

---

57. D. Fr. वन्दिस्तुतस्य for वन्दिस्तुतस्य. C. अङ्घ्रियुगं, D. अंह्रियुगं for अङ्घ्रियुगं.

58. D. दीप्तिं for कान्तिं.

59. D. Fr. वाष्प° for बाष्प°.

60. Fr. रामो विवाहोत्सवसंभृतेन सुखेन नीत्वा कतिचिद्दिनानि for the first half of our text.

भुवि विरचितमग्रे तल्पमालोक्य भीतिं
स्पृशति मनसि बालां साश्रुपातस्थितां ताम् ।
नृपतिभवनरत्नस्तम्भमालिङ्ग्य दोर्भ्यां
रघुपतिरुपगुह्य प्रापयद्भूमिशय्याम् ॥ ६२ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य कृतौ सीताविवाहवर्णनो नाम सप्तमः सर्गः ॥

अष्टमः सर्गः ।

आचरन्नथ स योषितो हठं
सा च वामचरिताऽनुरागिणः ।
अप्यनीप्सितविधानचेष्टितौ
तेनतुः सपदि संमदं मिथः ॥ १ ॥

कामिना समुपगुह्य बालिका
सप्रयत्नमुपवेशिताऽप्यसौ ।
वाञ्छति स्म सपदेतुमङ्कतः
साध्वसेन चपला मुहुर्मुहुः ॥ २ ॥

राघवेण परिरभ्य पृष्ठतः
सस्पृहं निगदिते मनोरथे ।
व्रीडयावनतवक्त्रपङ्कजा
धीरमस्मयत चारुहासिनी ॥ ३ ॥

अङ्गुलीषु परिगृह्य राघवे
वेधयत्युरसि रागिभिर्नखैः ।
सास्मितं विवलिताङ्गुलिर्बला-
दात्मनः करमुदास मानिनी ॥ ४ ॥

---

1. C. योषिति for योषितः. C. अनुरागिणि for अनुरागिण..

2. B. C. read the following for our text —सप्रयत्नमुपवेशिताप्यऽसौ बालिका समुपगुह्य कामिना । साध्वसेन चपला मुहुर्मुहुर्वाञ्छति स्म सपदेतुमकत ॥ Agreeing with the Sinhalese edition. [C. कामिनी for बालिका].

3 D. सस्मितं for सस्पृहं. A. B. मनोगते for मनोरथे. D. चारुभाषिणी for चारुहासिनी.

4. D. सस्पृहं for सस्मितं. D. विबलित° for विवलित°. C. भामिनी, D. कामिनी for मानिनी.

किन्नु वक्ति कुपितेति वेदितुं
कामिना निधुवने सविग्रहम् ।
याचितैनमभिकोपजिह्मित-
प्रेरितेक्षणकटु व्यलोकयत् ॥ ५ ॥

पुष्पकेतुहृतधैर्यबन्धनं
तस्य भावमवगम्य निर्गमैः ।
सावकाशमथ कुर्वतीः सखीः
संरुरोध वसनान्तसङ्गिनी ॥ ६ ॥

इच्छति स्म विरहं न कामिनी
सङ्गमं न भृशमाकुलीकृता ।
विप्रयोगसमये मनोभुवा
लज्जया नृपसुतस्य सन्निधौ ॥ ७ ॥

तस्य हस्तमबला व्यपोहितुं
मेखलागुणसमीपसङ्गिनम् ।
मन्दशक्तिररतिं न्यवेदय-
ल्लोलनेत्रगलितेन वारिणा ॥ ८ ॥

तत्र राजदुहितुर्बलात्क्रिया-
माचरत्युदितलोचनाम्भसः ।
आगमिष्यदनुचिन्त्य खण्डनं
भीतवद्भृशमकम्पताधरम् ॥ ९ ॥

---

5. D. स्वग्रहं निधुवनेषु कामिना for कामिना निधुवने सविग्रहम् Agreeing with the Sinhalese edition.

6. D. वसनान्तसङ्गिनी for वसनान्तसङ्गिनी And construes it with सखी.

न स्पृशामि रशनागुणं पुन-
निर्दयं भुजयुगेन पीडितः ।
इत्युवाच नृपसूनुरर्थिनी
सा ततान परिरम्भमस्फुटम् ॥ १० ॥
अन्तरीयहरणे कृतत्वरं
राघवं तमपयान्तमङ्गना ।
तत्पटान्तपरिधानरक्षिता
संरुरोध परिरभ्य पृष्ठतः ॥ ११ ॥
अंशुकस्य निशि रक्षणाकुला
हस्तयुग्मधृतनीविबन्धना ।
अप्रमादकृतिविघ्नमन्तरा
स्वापमाप शयने पराङ्मुखी ॥ १२ ॥
यद्ररक्ष दृढवस्त्रबन्धनैः
स्वापकालमवगम्य भर्तरि ।
तत्प्रमृष्टवति संगतस्मृतिः
सा रुरोद मुषितेव सस्वरम् ॥ १३ ॥
यत्नगम्यमथ मैथिलीमुखं
सोऽनुभूय नहि तृप्तिमाययौ ।
आननेन परिघट्य बोधितं
राजहंस इव पद्मकुड्मलम् ॥ १४ ॥

---

11. C अपयन्तं for अपयान्तं.

12 D. अप्रमादकृतविघ्नमन्तरा for अप्रमादकृतिविघ्नमन्तरा. Agreeing with the Sinhalese edition.

13 D. सस्वनम् for सस्वरम्

14. A. B चञ्चुनात्रि [त्र or पि] for आननेन. Corrected to this in the margins of A. B. The readings being completely blotted, we cannot make them out. C. विघटय्य for परिघट्य. B. C. पद्मकुट्मलं for पद्मकुड्मलं.

प्रेमवेगदृढदंशपीडितं
यत्तदीयमधरोष्ठपल्लवम् ।
तद्दयार्द्रहृदयः शनैः पिबन्
स क्षणेन विनिनाय वेदनाम् ॥ १५ ॥

ग्राहितं नपतिशक्रसूनुना
स्वाधरं विविधचाटुचेष्टितैः
पानवर्जितमदन्तविक्षितं
भूय एव सृजति स्म मानिनी ॥ १६ ॥

स्वं नितम्बमपवाहितांशुकं
कामिनी रहसि पश्यति प्रिये ।
प्रार्थनामपि विनैव पल्लव-
स्निग्धरागमधरं स्वयं ददौ ॥ १७ ॥

सा मदेन मदनेन लज्जया
साध्वसेन च विमिश्रचेष्टिता ।
आययौ सपदि तादृशीं दशां
या न वक्तुमपि शक्यविभ्रमा ॥ १८ ॥

वर्जनाय सुरतस्य भामिनी
वाञ्छति स्म पटुचाटुचेष्टितम्
यत्तदेव समजायत स्वयं
योषितो निधुवनस्य वृद्धये ॥ १९ ॥

---

15. C. °विक्षितं for °पीडितं

16. B. अदन्तविक्षतं, C अदन्तपीडितं for अदन्तविक्षितं.

17. C भामिनी for कामिनी.

18 C. झटिति for सपदि. A B. या च वक्तुमपि न क्षमा तदा for या न वक्तुमपि शक्यविभ्रमा. [B या हि for या च].

19 B. मैथिली for भामिनी.

अश्रुणा सुरतखेदमात्मनः
संमदं च पुलकेन कामिनी ।
व्याजहार न तु लज्जया गिरा
भावनृत्यकुशलेव भर्तरि ॥ २० ॥
यद्यदास तरसाभियोजितं
योषितो रतिषु खेदवृत्तये ।
तत्तदेव मृदु साधितं पुनः
कामिनाऽपनयति स्म तच्छ्रमम् ॥ २१ ॥
केशपाशमथ बन्धुमुद्यता
मैथिली निधुवनेन विश्रथम् ।
बाहुमूलगतलोचने प्रिये
लज्जयावनमति स्म सस्मितम् ॥ २२ ॥
इत्यनङ्गशिखिना हते हृदि
क्ष्माधिपस्य दुहितुर्निविष्टया ।
लज्जया कतिपयेषु तानवं
वासरेषु गलितेषु शिश्रिये ॥ २३ ॥
शर्वरीषु विरलीकृतत्रपा
निद्रया किल हृता नृपात्मजा ।
नीविबन्धनमतीत्य संस्थितं
हस्तमस्य न बलादपाहरत् ॥ २४ ॥

---

20. D. भामिनी for कामिनी C. नन्नु for न तु. A भावहृद्यकुशले च, C. भावनृत्यकुशले च, D. नव्यनृत्यकुशलेव for भावनृत्यकुशलेव. We with B

22. D. केशहस्तं for केशपाशं. Agreeing with the Sinhalese edition., C जानकी for मैथिली D. सस्मयं for सस्मितं.

23. B. C. गमितेषु for गलितेषु.

24. D. reads the following for our text:—हस्तमस्य न बलादपाहरत् । नीविबन्धनमतीत्य संस्थितं । शर्वरीषु विरलीकृतत्रपा । निद्रया किल हृता नृपात्मजा। Agreeing with the Sinhalese edition. C. सर्वरीषु for शर्वरीषु. C. अपानयत् for अपाहरत्.

निद्रिता प्रतिभयं भयानक-
स्वप्नदर्शनकृतं प्रपद्य सा ।
राघवं कुचघटावुरःस्थले
सन्निधाय परिषस्वजे दृढम् ॥ २५ ॥

ज्ञातमन्मथरसा मदातुरे
कामिनि क्षिपति नीविबन्धनम् ।
सा जहार करयुग्ममंशुका-
दञ्जलिं किल भयेन कुर्वती ॥ २६ ॥

संमतापि भुवनस्य मेधया
राघवे निधुवनोपदेशिनि ।
व्याजहार गुणितस्य विस्मृतिं
भूरिशस्तदुपदेशबाञ्छया ॥ २७ ॥

स्वेदबिन्दुनिचिताग्रनासिका
वूतहस्तलतिका सशीत्कृतिः ।
सोढमन्मथरसा नृपात्मजा
राघवस्य न बभूव तृप्तये ॥ २८ ॥

चोदयत्यवनिपालनन्दने
शिक्षितुं युवतिकृत्यनैपुणम् ।
देहजन्मशरखण्डितत्रपा
सा ययौ रहसि कर्मकर्तृताम् ॥ २९ ॥

---

25. C reads the following for our text —स्वापगा निशि भयं भयानक-स्वप्नदर्शनकृतं प्रपद्य सा । सन्निधाय परिषस्वजे दृढं राघवं कुचघटावुर स्थले ॥ Agreeing with the Sinhalese edition. D. उरस्तले for उर.स्थले.

26 D मैथिली, Fr. कामिनी for कामिनि. C. क्रमत्ति (?) for क्षिपति.

27. C. प्रज्ञया for मेधया. D. निधुवनोपदेशके for निधुवनोपदेशिनि.

28. D. °विन्दु° for °बिन्दु°.

यज्जगाद मदनेन पीडिता
तत्सहासरसमूचिषि प्रिये ।
सस्मितं वलितदेहशोभिनी
तत्तदस्फुटमुवाच लज्जिता ॥ ३० ॥
रत्नतल्पनिकटस्थिते शुके
संगतौ हृदि निधाय भाषितम् ।
निःसहास्मि विसृजेति जल्पति
व्रीडिता परिजघान पञ्जरम् ॥ ३१ ॥
रामवक्त्रगलितैः श्रमाम्बुभि-
श्छिद्रितं कुचयुगस्य कुङ्कुमम् ।
सा निरीक्ष्य हसिते सखीजने
संमुखाव्यपजगाम सस्मितम् ॥ ३२ ॥
स्वानुवृत्तिविधिवन्ध्यमीर्ष्यया
चोदितोद्यत इवाथ लज्जितम् ।
मैथिलस्य दुहितुर्मनोभव-
श्चेतसो निरवशेषमाक्षिपत् ॥ ३३ ॥
दीर्घिकाजलतरङ्गनिर्धुत-
त्यक्तपुष्पमयमण्डनौ क्वचित् ।
चाटुरम्यमितरेतराश्रयां-
स्तेनतुः प्रमदकानने मृजाः ॥ ३४ ॥

---

30. C. यद्भाण मदनेन क्लेषिता for यज्जगाद मदनेन पीडिता.

31. C. reads the verse thus —रत्नतल्पनिकटस्थिते शुके नि सहोऽस्मि विसृजेति जल्पति । संगतौ हृदि निधाय भाषितं व्रीडिता परिजघान पिञ्जरम्. D. नि.सहोऽस्मि for नि सहास्मि.

32. D. रामतुण्डनिसृतै-, Fr. भर्तृवक्त्रनिसृतै- for रामवक्त्रगलितैः.

33. D. reads the verse thus :—चोदितोद्यत इवात ईर्ष्यया मैथिलस्य दुहितुर्मनोभवः । स्वानुवृत्तिविधिवन्ध्यलज्जितं चेतसो निरवशेषमाक्षिपत् ॥ Agreeing with the Sinhalese edition.

चाटुमात्रकरणप्रयोजन-
स्तुल्यरागमपि स न्यपातयत् ।
योषितश्चरणपङ्कजद्वये
यावकं तरुणपल्लवप्रभे ॥ ३५ ॥
अङ्घ्रियुग्ममनुलिम्पतः स्वयं
कुङ्कुमेन तरुणार्करोचिषा ।
आरुरोह करयुग्ममस्य तत्
दूरमेव परिवृद्धवेपथु ॥ ३६ ॥
मेखलामधिनितम्बमर्पयं-
स्तत्र तत्र पुनरादधौ करम् ।
अत्र किंचिदनुपाश्रितः परं
दुर्नहो नु मणिमेखलागुणः ॥ ३७ ॥
आचरन्नथ विलेपनक्रियां
पाणिना पुलकितेन सस्पृहम् ।
सोऽस्पृशत्कुचयुगं पुनः पुन-
श्चन्दने सममपि स्थिते सति ॥ ३८ ॥
पत्रमानमिततर्जनीशिरः-
स्पृष्टकर्णलतिकोऽयमर्पयन् ।
पूर्वमर्धमुकुलीकृतेक्षणं
तन्मुखं सुरभिगर्भमन्वभूत् ॥ ३९ ॥

36. B. अंघियुगं, C. अँह्रियुगं for अंघ्रियुगं C has the following for the last two lines –आरुरोह परिवृद्धवेपथु दूरमेव करयुग्ममस्य तत् ॥

37. D अनुपाश्रितं, Fr. अनुशंसितं for अनुपाश्रित. A. B. C. दुर्णहो for दुर्नहो.

38. D. मुहुर्मुहु. for पुन पुनः. B C. हृदि for सति

39. D. ° स्पृष्टकर्णलतिकस्ततोऽर्पयन् for °[illegible]

आत्मनैव स तदा पुरा कृतं
यावकं युवतिदन्तवाससि ।
उज्जहार मुदितः पुनः पुन-
र्निष्पिबन्नधरपानलोलुपः ॥ ४० ॥

चुम्बति प्रियतमे बिलोचनं
योषितः स्वयमुपाहिताञ्जनम् ।
प्राप रागमविकाशचक्षुषः
कर्णगं निजमशोकपल्लवम् ॥ ४१ ॥

पुष्परत्नविभवैर्यथेप्सितं
सा विभूषयति राजनन्दने ।
दर्पणं ननु चकांक्ष योषितां
स्वामिसंमदफलं हि मण्डनम् ॥ ४२ ॥

तामनङ्गकृतचारुविभ्रमां
निर्दयं समुपगुह्य चुम्बितुम् ।
वीक्षितुं च समकालमप्रभु-
र्व्याकुलो मुहुरिवास राघवः ॥ ४३ ॥

प्रार्थिताऽपि न चकार कानिचित्
कानिचित् स्वयमपि व्यधत्त सा ।
अन्वभूद्धृदयरत्नविक्रय-
क्रीतमेनमबला यथेप्सितम् ॥ ४४ ॥

---

40. C reads the following for our text -उज्जहार स तदा पुनः पुनर्निष्पिबन्नधरपानलोलुप. । आत्मनैव मुदित· स यावकं प्राकृतं युवतिदन्तवाससि ॥ Agreeing with the Sinhalese edition.

41. D. °चक्षुषा for °चक्षुषः.

42. D. यथोचितं for यथेप्सितं.

येन येन हरति स्म तामसौ
तत्तदेव पुनराप योषितः ।
सज्जनेषु विहितं हि यच्छुभं
सद्य एव फलबन्धि जायते ॥ ४५ ॥

कर्मणि स्वमुखपद्मविच्युत-
स्वेदबिन्दुहतकान्तवक्षसि ।
तस्य चक्षुरुपकाञ्चि संचर-
द्वीक्ष्य वक्षसि मुमोच सा तनुम् ॥ ४६ ॥

भर्तरि प्रणयमौनमास्थिता
जल्पयत्यधरदंशनिग्रहैः ।
नो चकार वचनानि तादृशं
निग्रहं चिरमवाप्तुमिच्छया ॥ ४७ ॥

बालया हृदि निधाय स स्तनौ
दन्तमास्यकमलं प्रसादने ।
प्राप्तुमिच्छुरपि दोषतो विना
रोषमाविरकरोन्मुहुर्मुहुः ॥ ४८ ॥

अल्पदोषविषयेऽपि जम्पती
जग्मतुः प्रणयकोपवक्रताम् ।
स्नेहजातिरतिवृद्धिमागता
जायते सुलभरोषसव्रणा ॥ ४९ ॥

---

45. B. C निहितं for विहितं.

46. C. °विन्दु° for °बिन्दु° C. वपु for तनुम्.

47. C. भाषयत्यधरदंशपीडनै for जल्पयत्यधरदंशनिग्रहै . C. पीडनं for निग्रहं.

48. D. कोपं, Fr क्रोधं for रोषं.

49. D. स्वल्पदोष° for अल्पदोष°. C. दम्पती for जम्पती. C. D प्रणयरोष° for प्रणयकोप°. B. सुलभरोषसम्भवा, C. D. सुलभकोपसव्रणा for सुलभरोषसव्रणा.

मधुषु प्रणयकोपवह्निना
लोहितत्वमुपनीय पायितः ।
तत्कटाक्षविशिखो निपातितो
धैर्यमस्य निचकर्त सुस्थिरम् ॥ ५० ॥

कोपिता चिरनिवृत्तसंगतिः
सुप्तमेत्य परिबोधशङ्किनी ।
हस्तरुद्धचलकुण्डला धृत-
श्वासवृत्ति शनकैश्चुचुम्ब सा ॥ ५१ ॥

कैतवेन कलहेषु सुप्तया
स क्षिपन्वसनमात्तसाध्वसः ।
चोर इत्युदितहासविभ्रमं
सप्रगल्भमवखण्डितोऽधरे ॥ ५२ ॥

संगतानि परिहृत्य चारिणौ
मानमेत्य कलहं वितेनतुः ।
अन्ययातनयनौ किलोरसा
तौ निहत्य कुहचित्परस्परम् ॥ ५३ ॥

एकदारिकदनः स कान्तया
सार्धमिद्धरुचि सौधमम्बरम् ।
आरुरोह परिसंहृतातपं
द्रष्टुमर्धशशिमौलिसन्निभः ॥ ५४ ॥

---

50 C. प्रणयरोष° for प्रणयकोप°. D. रोहितत्व° for लोहितत्व°. B C. तत्कटाक्षविशिखोऽत्र पातित for तत्कटाक्षविशिखो निपातित.. B. C. स्थैर्य for धैर्य.

51 B. C. हस्तरुद्धचलकुन्तला for हस्तरुद्धचलकुण्डला.

52. B. C. चौर इति for चोर इति. B C. °संभ्रमं for °विभ्रमं.

53 C. reads the following for the first two lines:-मानमेत्य परिहृत्य चारिणौ संगतानि कलहं वितेनतु ॥ Agreeing with the Sinhalese edition.

54. B. C. °दमनः for °कदनः. D. भार्यया for कान्तया.

वासरस्य विगमे समीरणै-
र्मन्दनर्तितसुगन्धिकुन्तलाम् ।
सौधपृष्ठमधितस्थुषीं वचो
जानकीमिदमुवाच राघवः ॥ ५५ ॥

सन्निगृह्य करसन्ततिं क्वचि-
त्प्रस्थितोऽपि रविरेष रागवान् ।
अस्तमस्तकमधिश्रितः क्षणं
पश्यतीव भुवनं समुत्सुकः ॥ ५६ ॥

दिङ्मुखादपसरन्तमातपं
नष्टतेजसमनुव्रजन्मुहुः ।
रश्मिभिः समवबध्य भानुना
कृष्यमाणमिव लक्ष्यते तमः ॥ ५७ ॥

अन्तराणि तमसः प्रयच्छति
स्रष्टरीव जगती युगक्षये ।
भूय एव रविमण्डले रुचि-
र्लीयते जलधिमध्यवर्तिनी ॥ ५८ ॥

ध्वान्तजालमुपयाति सर्वतः
सागरे निहितमण्डलं रविम् ।
वारिभिः पिहितदण्डमायतं
भृङ्गचक्रमिव फुल्लमम्बुजम् ॥ ५९ ॥

---

55. D. प्रभञ्जनैः for समीरणैः. D. कुन्तलम् for कुन्तलाम्. C हर्म्यपृष्ठं for सौधपृष्ठं. C. D. सुन्दरीं for जानकीं.

56. B. सलीलया, C. सलालसं for सम्रुत्सुक.

57. D. भानुना समवबध्य रश्मिभि for रश्मिभिः समवबध्य भानुना.

59. C. वारिधौ for सागरे. C अम्बुभि. for वारिभिः.

एकचक्रमिव राजते नभः-
स्यन्दनस्य रविबिम्बमस्तगम् ।
उत्पतत्यविकले निशाकरे
धातुपङ्कपरिदिग्धमण्डलम् ॥ ६० ॥

संहृतात्मकिरणं यथा यथा
वृद्धिमुद्वहति मण्डलं क्रमात् ।
सागराम्भसि तथा तथा रवि-
र्गौरवादिव शनैर्निमज्जति ॥ ६१ ॥

उन्मुखा दिनकरस्य रश्मयः
सागरान्तरितमण्डलश्रियः ।
भान्ति तोयमभिभूय निर्गता
वाडवस्य शिखिनः शिखा इव ॥ ६२ ॥

सन्ध्यया च परिरुद्धमग्रतो
वासरस्य विगमे घनं तमः ।
भाति सिन्धुसलिलाभिन्नमेकतः
प्रावृषीव सलिलं पयोनिधेः ॥ ६३ ॥

सन्ध्ययाऽरुणितपत्रसंचयं
श्लक्ष्णपल्लवनिरन्तरं वनम् ।
विन्दतीव परिणामसम्पदं
पश्य तत्तमसि सर्पति क्रमात् ॥ ६४ ॥

---

60. C. reads this verse in the following way —उत्पतत्यविकले निशाकरे धातुपङ्कपरिदिग्धमण्डलं । एकचक्रमिव राजते नभ स्यन्दनस्य रविबिम्ब-मस्तगम् ॥

62 C. नीरं for तोयं.

63. C. गांगजलभिन्नं for सिन्धुजलभिन्नं.

64. D. पल्लवैरिव निरन्तरं वनम् for श्लक्ष्णपल्लवनिरन्तरं वनम्.

अन्धकारनिकरेण सर्वतः
कृष्णसर्पमलिनेन सर्पता ।
रुध्यमानविषयाः समन्ततः
संकुचन्ति परिखा नु दिग्भुवः ॥ ६५ ॥

भाति मत्तशिखिकण्ठकर्बुरं
ध्वान्तजालपरिरुद्धमम्बरम् ।
अर्कदीपकृततापसंभृत-
प्रौढकज्जलमलीमसं यथा ॥ ६६ ॥

पश्य दीप्तरुचि पूर्वमुद्गतं
ज्योतिरेतदसितोरगात्विषः ।
छिद्रमेकमिव विष्णुवर्त्मनो
दूरमग्नरविरश्मिभासुरम् ॥ ६७ ॥

पश्चिमे नभसि भान्ति लोहिता-
स्तारका रविरथस्य वेगिनः ।
लोहचक्रहतमेरुमस्तका-
दुद्गता इव हुताशविप्रुषः ॥ ६८ ॥

मीलिता रविभयेन तारका
रश्मिधामहतलोहिता इव ।
उन्मिषन्ति दिनकृत्करात्यये
दिङ्मुखैकरचनाः समन्ततः ॥ ६९ ॥

---

65 D. कालसर्पमलिनेन for कृष्णसर्पमलिनेन. D. व्याप्यमानविषया for रुध्यमानविषया C D संकुचन्ति परितो दिशा इव for संकुचन्ति परिखा नु दिग्भुवः. Agreeing with the Sinhalese edition

66 C परिणद्धं for परिरुद्धं

68. C रोहिता for लोहिताः. A B हुताशविप्रष for हुताशविप्रुष.

69. C उस्रधामहतरोहिता for रश्मिधामहतलोहिता.

पूर्ववारिनिधिपृष्ठतः क्रमा-
दर्शयन् हिमरुचिः कलान्तरम्
एकपक्षमुलभक्रमामसौ
वृद्धिमद्य मुहुरेव विन्दति ॥ ७० ॥

पश्य भृङ्गपटलासितप्रभं
पूर्वतः सपदि निर्गतं तमः ।
यत्करेण जघने हिमांशुना
तुद्यमानमिव याति पश्चिमम् ॥ ७१ ॥

क्षीरवारिनिधिना विवर्धिना
प्लाव्यमानवदसौ निशाकरः ।
उत्पतत्युदयतः शनैः शनै-
र्हारशुभ्रनिजरश्मिसंचयः ॥ ७२ ॥

क्षिप्यमाणघनतामसोत्करं
दूरमुत्सरति मण्डलं दिशाम् ।
शीतरश्मिकिरणस्य सर्वतो
दातुमन्तरमिव प्रसर्पतः ॥ ७३ ॥

क्षीयमाणवपुरिन्दुरुद्गमे
वर्धमानकिरणः समन्ततः ।
अर्कतप्तगगनानुबन्धिना
तेजसेव परितो विलीयते ॥ ७४ ॥

---

70. D पूर्वतोयनिधिपृष्ठग. for पूर्ववारिनिधिपृष्ठत .
71 B, C ताड्यमान for तुद्यमानं
72. C क्षीरतोयनिधिना for क्षीरवारिनिधिना. D. विवर्धता for विवर्धिना. C क्षपाकर for निशाकर
73 D मण्डले for मण्डलं. B शीतरश्मिप्रसरस्य, C शीतरश्मिप्रसराय, D शीतरश्मिकिरणाय for शीतरश्मिकिरणस्य C D प्रसर्पते for प्रसर्पत
74. A B C. °गगण° for °गगन°.

बद्धरागमुदितो निशाकरः
संत्यजन्दिशमसौ बलिद्विषः।
शोकदीन इव पाण्डुरोचिषा
कार्श्यमेति वपुषा मुहुर्मुहुः ॥ ७५ ॥
पीतमेतदलिवृन्दमेचकं
ध्वान्तमेव सकलं हिमत्विषः।
स्वच्छविग्रहतया शशाकृति-
च्छद्मना बहिरिवास्य लक्ष्यते ॥ ७६ ॥
विप्रयुक्तवनितामुखाम्बुज-
प्रोद्धृतद्युतिचयेन चन्द्रमाः।
नूनमेष पुनरात्ममण्डलं
पूरयत्यसितपक्षकर्शितम् ॥ ७७ ॥
अन्धकारनिकरं करैरिमं
भिन्दतः शशधरस्य मण्डले।
धूलिपुञ्ज इव भाति तामसः
क्षोभवेगपतितः शशाकृतिः ॥ ७८ ॥
गुल्मलीनमलिकर्बुरं तमः
कर्तुकाम इव शार्वरीकरः।
सर्वतो विटपजालरन्ध्रकैः
प्रेरयत्युदयशेखरः करान् ॥ ७९ ॥

---

76 D reads पश्य पीतमलिवृन्दमेचकं ध्वान्तमस्य सकलं हिमत्विषः। स्वच्छविग्रहतया शशाकृतिच्छद्मना बहिरिवाभिलक्ष्यते ॥ for our text. Agreeing with the Sinhalese edition B C °कर्बुरं for °मेचकं.

77 C विप्रयुक्तललनामुखोत्पल° for विप्रयुक्तवनितामुखाम्बुज° C मुहुरात्म-मण्डल for पुनरात्ममण्डलं

78. D. °निचयं for °निकरं C. भञ्जतो मृगवरस्य for भिन्दत शशधरस्य. D. मृगाकृति for शशाकृति.

79 C अलिमेचक for अलिकर्बुरं D कटुकाम for कर्तुकाम C. यामिनी-कर., D. शर्वरीकर for शार्वरीकरः C. D. °रन्ध्रके for °रन्ध्रकैः

चन्द्ररश्मिनिहतोऽपि तामसः
सुप्तकोकिलकुलेन संचयः ।
उल्लसत्कुमुदगन्धसंभृतैः
सावशेष इव भाति षट्पदैः ॥ ८० ॥

पत्रजालशतरन्ध्रविच्युतः
सामिसिक्त इव भूरुहस्तले ।
स्थण्डिले निरवशेषमिन्दुना
भाति मुक्त इव रश्मिसंचयः ॥ ८१ ॥

उल्लसत्सु कुमुदेषु षट्पदाः
संपतन्ति परितो हिमांशुना ।
भिद्यमानतमसो नभस्तला-
द्विच्युता इव तमिस्रबिन्दवः ॥ ८२ ॥

तारका रजतभङ्गभासुरा
लाजका इव विभान्ति तानिताः ।
दिग्वधूभिरुदयादुदेष्यतो
वर्त्मनि ग्रहपतेः समन्ततः ॥ ८३ ॥

मित्रनाशपरिरोदिताश्चिरं
मूर्छिता इव विभान्ति दीर्घिकाः ।
सुप्तपद्मविनिमीलितेक्षणा
वृद्धशान्तकलहंसकूजिताः ॥ ८४ ॥

---

80. C चन्द्रपादविहतोऽपि for चन्द्ररश्मिनिहतोऽपि.

81. D. reads—सामिसिक्त इव भूरुहस्तले स्थण्डिले निरवशेषमिन्दुना । भाति मुक्त इव रश्मिसञ्चयः पत्रजालशतरन्ध्रविच्युत for our text.

82. D छिद्यमानतमस· for भिद्यमानतमस.. D. विन्द्व. for बिन्दवः॰

सैकते शशिमरीचिलेपने
रोधसीन्दुकरपुञ्जसन्निभम् ।
राजहंसमसमीक्ष्य कातरा
रौति हंसवनिता सगद्गदम् ॥ ८५ ॥
तिग्मरश्मिविरहे सरोजिनी
लोकमिन्दुकिरणावगुण्ठितम् ।
नाभिवीक्षितुमिव क्षपागमे
मीलयत्यसितवारिजेक्षणम् ॥ ८६ ॥
जृम्भमाणचलपत्रसंहते-
रन्तरं कुमुदखण्डसंपदः ।
संविधातुमिव पद्मसंततिः
संकुचत्यनतिदूरवर्तिनी ॥ ८७ ॥
भाति बिभ्रदसितोत्पलप्रभं
लक्षणं मृगमयं हिमद्युतिः ।
श्यामलावदनबिम्बकान्तिभि-
र्बद्धमध्य इव रूप्यदर्पणः ॥ ८८ ॥
यौवनोपहितपाण्डुकान्तिना
त्वन्मुखेन विजितो निशाकरः ।
लज्जयेव घनमेघसन्ततौ
रुद्धरश्मिनिवहो निलीयते ॥ ८९ ॥

---

85 C reads शारदिन्दुकरपुञ्जसन्निभं राजहंसमसमीक्ष्य कातरा । रौति हंसवनिता सगद्गद सैकते शशिमरीचिलेपने for our text. Agreeing with the Sinhalese edition

87 A B °पर्णसंहने, C. °पर्णसंतते, D पत्रसन्ततेः for पत्रसंहते C. D. °षण्ड° for °खण्ड ° D. पद्मसंहति for पद्मसन्ततिः

88 C °विम्बदीप्तिभि. for °विम्बकान्तिभि B. C. नद्धमध्य, D विद्धमध्य for बद्धमध्य.

89 A. B यौवनोपहितलोध्रपाण्डुना, C. यौवनोपहतपाण्डुदीप्तिना for यौवनोपहितपाण्डुकान्तिना. C. विजित क्षपाकर for विजितो निशाकर.

अङ्कितः शशमयेन लक्ष्मणा
कृष्णमेघशकलं निशाकरः ।
मध्यलग्नमिव मन्दमुद्वहन्
निष्पतत्यसितवारिदोदरात् ॥ ९० ॥
उद्धृतद्युतिरिवैष मध्यतो
भाति कृष्णमृगलक्षणः शशी ।
कुन्दगौरदशनावलीमिमां
वेधसा रचयितुं तव प्रिये ॥ ९१ ॥
त्वन्मुखावजितमण्डलश्रिय-
स्तत्कलङ्कममृतद्युतेरयम् ।
वीक्ष्य शीतकरकान्ततोरणः
शोकबाष्पमिव वारि मुञ्चति ॥ ९२ ॥
इति सपदि वदन् वदान्यवर्यः
शयनशिलातलमिन्दुपादधौतम् ।
अलसतरगतिर्नरेन्द्रकन्या-
मनुगमयन्मदमन्थरः प्रपेदे ॥ ९३ ॥
अथ सुरतमखे सुखं समाप्ते
मदनहुताशनदग्धमानहव्ये ।
चषकमधुनि सन्निविष्टबिम्बं
मुखमनयदयितासखः स सोमम् ॥ ९४ ॥

---

90. A hiatus in the first line in A. B [* * लक्ष्मणा] C. कालमेघशकलं क्षपाकर for कृष्णमेघशकलं निशाकर

91 B भाति कृष्णमृगलांछनो विधु, C भाति कृष्णशशलक्षणो विधु. for भाति कृष्णमृगलक्षण शशी C. कुन्दशुभ्रदनावलीमिमां, D कुन्दधौतरदनावलीमिमां for कुन्दगौरदशनावलीमिमा C. ब्रह्मणा for वेधसा

92. A. B. त्वन्मुखापहृतमण्डलश्रियः for त्वन्मुखावजितमण्डलश्रिय D. 'तोरणं for °तोरण

दुहितुरवनिभर्तुरुन्मयूखं
मणिचषकं परिमण्डलं विहाय ।
प्रियमुखपरिभुक्तधामवाञ्छा
करकमलं नयति स्म हेमशुक्तिम् ॥ ९५ ॥

नियतमिह पतन्ति दन्तधारा
मदनमदोद्धतयोरितीव भीत्या
अधरकिसलये विहाय यूनो-
र्मधु पिबतोर्नयनान्युपास्त रागः ॥ ९६ ॥

मुहुरपि मधुपो विवृद्धतृष्णो
न विरमति स्म पिबन् सुगन्धि हृद्यम् ।
युवतिमुखमसंशयं यतो यत्
सरसिरुहं परमार्थतस्तदेतत् ॥ ९७ ॥

अचकमत मधु प्रियामुखेन
क्षितिपसुतः प्रणयादसौ वितीर्णम् ।
अधरमितवतो व्रणस्य दाहात्
स्फुटरचितभ्रुकुटिर्मधुस्रवेण ॥ ९८ ॥

इति सपदि निशामतीयतुस्तौ
प्रविधुतकौसुमभक्तिसूत्रशेषम् ।
रतिकलहकचग्रहेण माल्यं
विलुलितकेशसमर्पितं दधानौ ॥ ९९ ॥

95. C has the following —प्रियमुखपरिभुक्तधामवाञ्छा करकमलं नयति स्म हेमशुक्ति । दुहितुरवनिभर्तुरुन्मयूख मणिचषकं परिमण्डल विहाय.

96. D मदमदनोद्धतयो for मदनमदोद्धतयो. C. D. °किशलये for °किसलये C उवास राग D अवाप राग for उपास्त राग

99 A B read this verse in the following way —रतिकलहकचग्रहेण माल्यं विलुलितकेशसमर्पितं दधानौ । इति सपदि निशामतीयतुस्तौ प्रविधुतकौसुमभक्तिसूत्रशेषम् ॥ Agreeing with the Sinhalese edition.

अथ हृदयङ्गमध्वनितवंशकृतानुगमै-
रनुगतवल्लकीमृदुतरक्वणितैर्ललनाः ।
तमुषसि भिन्नषड्जविषयीकृतमन्द्रखैः
शयितमबोधयन् विविधमङ्गलगीतिपदैः ॥ १०० ॥

हृदयनिपीडनोद्धृतपयोधरकुङ्कुमया
रतिषु दधानया दशनखण्डितमोष्ठमणिम् ।
चिरकृतजागरारुणितमन्थरलोचनया
शयनममुच्यत प्रियमनु प्रमदोत्तमया ॥ १०१ ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमारदासस्य कृतौ सम्भोगवर्णनो नामाष्टमः सर्गः ॥

नवमः सर्गः ।

इति प्रवृत्तस्य सुतस्य केषुचि-
दिनेषु यातेषु सुखेन भूपतिः ।
पुरं प्रतस्थे वनितापरिग्रहै-
स्त्रयं सुतानामितरत्समस्य सः ॥ १ ॥

उपेत्य पत्या सह शोकसंपदा
कलत्रभारेण च मन्थरक्रमा ।
पितुः प्रयाणाभिमुखी भुवः सुता
ततान पादावुदबिन्दुभिर्दृशोः ॥ २ ॥

असावपत्यं गुणपक्षवर्तिनीं
मतिं समालम्ब्य गुणैः पुरस्कृतम् ।
जगौ ततः साधु गुरुर्गरीयसी
गिरं सतीनामुचितव्रताश्रयाम् ॥ ३ ॥

परः प्रकर्षो वपुषः सद्गुन्नति-
र्गुणस्य तातो नपतिर्नवं वयः ।
इति स्म मा मानिनि मानमागमः
पतिप्रसादोन्नतयो हि योषितः ॥ ४ ॥

---

1. C. केषुचिद्दृतेषु वारेषु, D केषुचिद्दिनेषु मासेषु for केषुचिद्दिनेषु यातेषु

2. C. reads the following for our text —कलत्रभारेण च शोकसंपदा पदद्वयं मन्थरविक्रमा पितु । ततान पत्याद्रिरुपेत्य बिन्दुभिर्दृशो प्रयाणाभिमुखी भुवः सुता ॥ The marginal note on D. says —सिंहललिपिसन्ने तु उदर्भिर्बिन्दुभिरित्येव पाठः उपलभ्यते. C agrees with the Sinhalese edition

3. D. reads the following for our text —गुरुस्ततोऽसौ गुणपक्षवर्तिनीं मतिं समालम्ब्य गुणैः पुरस्कृताम् । अपत्यकां साधु जगौ गरीयसी गिरं सतीनामुचितव्रताश्रयाम् ॥ B. गुणपक्षवर्धिनी, C. गुणपक्षवन्तिनीं for गुणपक्षवर्तिनीं.

4. B पतिप्रसादोन्नतय कुलस्त्रियः for पतिप्रसादोन्नतयो हि योषित .

स्त्रियो न पुंसामुदयस्य साधनं
त एव तद्धामविभूतिहेतवः
तडिद्वियुक्तोऽपि घनः प्रजृम्भते
विना न मेघं विलसन्ति विद्युतः ॥ ५ ॥

गतापि भर्त्रे परिकोपमायतं
गिरः कृथा मा परुषार्थदीपनीः ।
कुलस्त्रियो भर्तृजनस्य भर्त्सने
परं हि मौनं प्रवदन्ति साधनम् ॥ ६ ॥

पतिव्रता वश्यमवश्यमङ्गना
करोति शीलेन गुणस्पृहं पतिम् ।
विनष्टचारित्रगुणा गुणैषिणः
पराभवं भर्तुरुपैति दुस्तरम् ॥ ७ ॥

अलं त्वयि व्याहृतिविस्तरेण मे
कुरुष्व तद्यच्चरितं त्वदाश्रयम् ।
श्रुतिं प्रयातं जरसैव जर्जरं
सहस्रधेदं हृदयं न दारयेत् ॥ ८ ॥

---

5 C कारणं for साधनं A B त एव सौभाग्यविभूतिसाधनाः for त एव तद्धामविभूतिहेतव B C घनो विजृम्भते for घन प्रजृम्भते

6 D गिरोऽकृथा मा for गिर कृथा मा B. C. परुषार्थदीपिनी for परुषार्थदीपनी A., B पतिव्रता for कुलस्त्रिय . D reads the last two lines thus — वदन्ति मौनं हि परं प्रसाधनं कुलस्त्रियो भर्तृजनस्य भर्त्सने ॥ D. agrees with the Sinhalese edition.

7. A B. om. the first line B. C. शीलैश्च for शीलेन. C. °चारित्र्यगुणा for °चारित्रगुणा.

8. A. C. कृतं, B अरं for अलं.

अयं त्वदेकप्रवणो मनोरथो
वृथाऽद्य दैवादपिनाम नो भवेत् ।
इति प्रवक्तुर्जरतो निरासिरे
निगृह्य कण्ठं वचनानि मन्युना ॥ ९ ॥

उदग्रभासः शिखया शिखामणेः
स्रजा च धम्मिल्लकिरीटदृष्टया ।
प्रमृज्य पादौ जनकस्य जम्पती
क्षयादयातामथ लम्भिताशिषौ ॥ १० ॥

कृतो वियोगेन शुचः समुद्भवः
समर्पितः साधुवरेण संमदः ।
मनस्यवस्थाननिमित्तमीशितुः
क्षणं विवादानिव तस्य चक्रतुः ॥ ११ ॥

हलायुधाभस्य सकाहलो रवः
पयोधिनिर्घोषगभीरभैरवः ।
ततः प्रगल्भाहतभेरिसंभवः
प्रकाशयामास गतिं समन्ततः ॥ १२ ॥

गजेन्द्रघण्टाघटितश्च निःस्वनः
करेणुकाबृंहितबृंहितो मुहुः ।
भयं वितन्वन् भवनेषु पक्षिणां
दिशः ससर्पाथ समं समुद्धतः ॥ १३ ॥

---

9 B सुवैव, C सुधाद्य for वृथाद्य. B C कण्ठे for कण्ठं.

10. D. °किरीटसक्तया for °किरीटदृष्टया D दम्पती for जम्पती B C गृहाद् for क्षयाद्

13 C °प्रभवश्च for °घटितश्च C समन्तत, D समुद्भूत for समुद्धत D. agrees with the Sinhalese edition.

समारुरोहाथ रथं महारथः
सहेमचित्रं सह राजकन्यया ।
दिनादिसन्ध्यानुगतां पिशङ्गितां
स्वरश्मिदीप्त्येव दिवं दिवाकरः ॥ १४ ॥
शिरःप्रदेशस्थसमुद्गपेटिका-
गृहीतवीणांशुकपञ्जरादयः ।
सवेत्रहस्तैः स्थविरैरधिष्ठिताः
स्त्रियोऽप्यनुस्यन्दनमत्यगुर्मुदा ॥ १५ ॥
मदान्धमातङ्गघटाद्रिसंकटे
परिक्रणन्ती बलकायनिम्नगा ।
तरङ्गिता वल्गुतुरङ्गरङ्गितैः
पुरः प्रतस्थे पुरुहूततेजसः ॥ १६ ॥
स्वदृष्टिरोधि श्रवणाग्रमारुतै-
रजो रथोत्थं यदि नाहरिष्यत ।
विनिर्गताभिर्न पुरो मदस्रुतां
घटाभिरद्रक्ष्यत वर्त्म दन्तिनाम् ॥ १७ ॥
व्यतीतरथ्येऽथ रथे कपोलयो-
र्विलासवत्या लसदंशुजालयोः ।
पपात तस्याः पुरगृह्यदीर्घिका-
समीरणानर्तितपद्मजं रजः ॥ १८ ॥

---

14. D स्वरश्मिकान्त्येव for स्वरश्मिदीप्त्येव

15. B C गृहीतवीणांशुकपञ्जरादय for गृहीतवीणांशुकपञ्जरादय A अत्य-गुस्तदा, B अत्यगुर्मुदा, C. अत्यगुर्मुदा, D. अन्वयुस्तदा. We with C. The Simhalese edition reads अपि स्त्रिय स्यन्दनमन्वतीयुः

17. C. पुरोगताभिर्न तदा मदस्रुतां for विनिर्गताभिर्न पुरो मदस्रुतां. C. हस्तिनां for दन्तिनां

18 A. C सद्म for तस्या.

वराङ्गना प्रस्तरभेदकोटिभि-
र्हतस्य चक्रे चलनं वरूथिनः ।
पिधाय यत्तच्चलनं पथि प्रियं
तमाललम्बे बलसन्निधावपि ॥ १९ ॥

रथध्वनिप्रापितसंमदं गवां
कुलं समुत्पुच्छयमानमुन्मुखम् ।
उदग्रकर्णं परिधावदेकतो
ददर्श सीताऽथ वनान्तवर्तिनी ॥ २० ॥

विनिद्रपद्मा मृदुभिः समीरणै-
र्विसारयन्त्यः कलहंसिकागिरः ।
स्वदेशसीमासरितो विलङ्घिताः
शुचं वधूचेतसि साधु संदधुः ॥ २१ ॥

विवृत्तदृष्टा विषयव्यतिक्रमा-
च्छलैर्निमज्जन्त इवावनीतले ।
स्वजन्मभूमौ गिरयो नृपात्मजा-
कपोलमातेनुरजस्रमश्रुभिः ॥ २२ ॥

द्विपेन्द्रदन्ताहतवन्यसल्लकी-
कषायगन्धिः पथि तत्र योषिताम् ।
शनैर्विधुन्वन्नलकाग्रवल्लरी-
र्मुखानि पस्पर्श वनान्तमारुतः ॥ २३ ॥

---

20 D वनान्तचारिणी for वनान्तवर्तिनी.

21 A C मृदुभिश्च मारुतै for मृदुभि. समीरणै . A. C. विसारयन्तः for विसारयन्त्य D. बधूचेतसि for वधूचेतसि.

22 D स्वजन्मभूमे for स्वजन्मभूमौ

23. D गजेन्द्र° for द्विपेन्द्र°. D. °शल्लकी° for °सल्लकी°.

अथ प्रतानः प्रततान तामसो
नृपस्य भीमं भयमादिशन्दिशः ।
क्षिपन् क्षपाया विगमेऽपि संहतिं
प्रसह्य वैरोचनरोचिषां पथि ॥ २४ ॥
अरिष्टसंतापविरूपदर्शना-
स्तमोऽभिभूताः प्रतिकूलमारुताः
अविप्रसन्नानि मुखानि भेजिरे
दिशो विनाशोपनता इव क्षणम् ॥ २५ ॥
अथ प्रकाशीभवदग्रतो दिशं
क्षणादुदीचीमवभास्य दीप्तिभिः ।
बलेन तेजः पुरुषाकृतिश्रिया
विभक्तमुत्पातमनु व्यदृश्यत ॥ २६ ॥
ततो दधानः श्रवणावसङ्गिनीं
विशुष्कपद्मेन्दुरुहबीजमालिकाम् ।
विनिद्ररक्तोत्पलशङ्क्या ततां
विलोचनोपान्त इवालिसन्ततिम् ॥ २७ ॥
विशालवामांसतटावलम्बिनीं
समुद्वहन् द्वीपितनुं तनूदरः ।
परिज्वलंस्तीव्रतपोहुताशन-
स्फुलिङ्गपातैरिव बिन्दुचित्रिताम् ॥ २८ ॥

---

26. The Sinhalese edition reads the following for the last two lines of our text :—अदृश्यतोत्पातमनु व्यपाश्रितं बलेन तेज पुरुषाकृतिश्रिया

27 C D read the following for our text —विनिद्ररक्तोत्पलशंकया ततं [ता] विलोचनोपान्त इवालिसन्ततिम् । ततो दधान. श्रवणावसङ्गिनी विशुष्कपद्मेन्दु-रुहबीजमालिकाम् ॥ Agreeing with the Sinhalese edition.

28 B. C. °तटावलम्बिनी for °तटावलम्बिनीं B C. व्याघ्रतनुं for द्वीपितनुं B. C. परिज्वलत्तीव्र° for परिज्वलंस्तीव्र° Agreeing with the Sinhalese edition. B. C. पट्टचित्रिताम् for बिन्दुचित्रिताम्

भुजेऽतिभीमे सशरं शरासनं
निधाय वामे निधनावहं द्विषाम् ।
करेऽपरस्मिन् परदुर्गपारगं
परं स बिभ्रत्परशुं परासुहा ॥ २९ ॥

तपोऽभिधानस्य सितेत्वराध्वनः
शिखा इवादित्यमयूखपिङ्गलाः ।
जटा विधुन्वन् वलिताः समन्ततः
समीरणैरात्मरयेण संभृतैः ॥ ३० ॥

प्रभुर्भृगूणां जगदे जगत्सृजः
परोऽवतारो ज्वलनं वितन्वता ।
हसेन धुन्वन्नथ तद्बलं बली
प्ररुध्य रामेण रुषावृता गिरः ॥ ३१ ॥

न राम रामं युधि जेतुमुद्यमो
विधीयतामन्यमिव क्षितिक्षितम् ।
सरित्तटीपाटनपाटवस्पृशं
न गोपतिं प्राप्य विशीर्यते नगः ॥ ३२ ॥

रघोरपत्ये जगतीपतिद्विषो
वृथा तव स्यादिह विक्रमक्रमः ।
अलं विसारिग्रसनस्थपाटवो
न दन्दशूकप्रभवे विहङ्गमः ॥ ३३ ॥

तव प्रयोगे धनुषोऽनुशासितुः
शरासने भूधरधन्वनः परम् ।

---

30. A B. read the following for our text :—समीरणैरात्मरयेण संभृतै जटा विधुन्वन् वलिताः समन्तत. । तपोभिधानस्य सितेतराध्वनः शिखा इवादित्यमयूखपिङ्गलाः.

इतः प्रवृत्तापि न नूनमागता
विपत् त्वदीयश्रवणस्य गोचरम् ॥ ३४ ॥

निशम्य तस्यैतदितीरितं वचो
जगाद शिष्यः स पुनः पिनाकिनः ।
परस्य वृद्धिं यशसो वितन्वतीं
वृथा विधित्सन् धनुषो भिदामिदम् ॥ ३५ ॥

नवेश्वर स्तब्धतरं धनुर्द्वयं
विधाय वन्ध्येतरबाणपातनम् ।
विशामधीशे किल विश्वकर्मणा
पुरन्दराख्याय पुरा व्यतीर्यत ॥ ३६ ॥

विसृज्य पूर्वं दनुजारये धनु-
स्तयोरथादायि रथाङ्गधारिणे ।
धनुस्तथैकं त्रिपुरं दिधक्षते
त्रिलोचनाय त्रिदशाधिपेन तत् ॥ ३७ ॥

विवित्सया तद्भृतजन्यतेजसो
व्यधत्त यत्नेन तथा मरुत्पतिः ।
यथाऽहवो हव्यवहोग्रतेजसो-
रजय्यशक्त्योरजयोरजायत ॥ ३८ ॥

---

34. A. B. C ध्रुवम् for परम्.

35 A. B तस्येदमुदीरितं for तस्यैतदितीरितं. A B जगाद शिष्यो बलवत्पिनाकिन. for जगाद शिष्य स पुन पिनाकिन A B. भिदामिमाम् for भिदामिदम् C. omits the second line.

37. C. reads the last two lines thus —धनुस्तथैकं त्रिदशाधिपेन तत् त्रिलोचनाय त्रिपुरं दिधक्षते ॥ Agreeing with the Sinhalese edition.

38. C. D. read the following for our text —मरुत्पतिस्तद्भृतजन्यतेजसौ विवित्सया हव्यवहोग्रतेजसोः । अजय्यशक्त्योरजयोरजायत व्यधत्त यत्नेन यथाऽहवस्तथा ॥ Agreeing with the Sinhalese edition.

चकार चक्रादि विहाय देवयो-
युगं महेष्वासयुगेन संयुगम् ।
दिशो दशापि प्रतिरुध्य पत्रिभिः
समाः सहस्राणि समेतसाहसम् ॥ ३९ ॥

अथो विकृष्टं मृदुभूतमीश्वरः
ससर्ज यच्चापमभेदि तत्त्वया ।
अगाद्दचीकाय वितीर्णमक्षतं
क्रमेण हस्तं मम वैष्णवं धनुः ॥ ४० ॥

गुणावुभावस्य तयोर्जगच्छ्रुतिं
जहाति नैको दृढतेति विश्रुतः ।
असंशयं ज्येति निरूढिमागतः
परो ममैव श्रवणान्तगोचरः ॥ ४१ ॥

अपाङ्गभागावधि चापपूरणं
सुदुष्करं तिष्ठतु विष्णगोचरम् ।
गुणं यदि प्रापयसीह जिह्मतां
बलोपपन्नेषु ततस्त्वमग्रणीः ॥ ४२ ॥

निधाय बाणं धनुषीह पूरिते
वधः स्वहस्तेन तवैष सत्क्रिया ।
इतीरयीत्वा तनयस्य भूपते-
र्मुमोच हस्ते सशरं शरासनम् ॥ ४३ ॥

---

40. D ऋषीकाय for ऋचीकाय. We with A. B. C.

41. D. जगच्छ्रुतं (?) for जगच्छ्रुति.

42. D वक्रतां for जिह्मता

43 D उदीरयित्वा for इतीरयित्वा.

ततः स शून्यामिव मुष्टिमानय-
न्नपाङ्गदेशं दशकण्ठसूदनः ।
बलादविज्ञातविकर्षणश्रम-
श्चकर्ष गुञ्जद्गुणबन्धनं धनुः ॥ ४४ ॥
स तेन मुक्तः किल सायको दिवः
पदं तपस्यद्वृषभस्य वाञ्छतः ।
द्वितीयवर्णस्य निहन्तुरात्मनो
विधाय नीशारमथ व्यतिष्ठत ॥ ४५ ॥
रिपोरजय्यस्य जयेन मानवैः
सभाज्यमानो बहुमानमन्त्रणैः ।
मनोज्ञवासे पथि मैथिलीसखः
सुखेन नीत्वा कतिचिद्दिनानि सः ॥ ४६ ॥
व्यपावृतद्वारमुखेन सन्ततं
बलेन भूम्ना विशता कृतध्वनिम् ।
पुरीमुदन्वन्तमुदग्रनिस्वनं
तनुं पिबन्तीमिव कुम्भजन्मनः ॥ ४७ ॥
नरेन्द्ररथ्योभयभागचारित-
प्रसारिकालागुरुधूपवासिताम् ।
ततामनन्तैरुपरत्नतोरणं
सपङ्क्तिजाष्टापदकुम्भमण्डलैः ॥ ४८ ॥

44. C. दशकण्ठमर्दनः for दशकण्ठसूदनः.

45. D. अथो for अथ.

46. B. C. बहुमानसत्क्रियैः for बहुमानमन्त्रणैः. The reading of B. C. appears preferable to the varients of other Mss. and printed editions.

47. D. कृतस्वरम् for कृतध्वनिम्.

48. C. D. नृपेन्द्र° for नरेन्द्र°. C. °कृष्णागरु°, D. °कालागरु° for °कालागुरु°.

परिक्रगत्काञ्चनकिङ्किणीगुणैः
सुगन्धिना गन्धवहेन ताडितैः ।
भ्रमत्पताकानिकरैरुदर्चिषो
वितन्वतीमुष्णघृणेः करच्छिदाम् ॥ ४९ ॥

मधुव्रतव्रातविरावकिङ्किणी-
रुतेन रम्यं मणितोरणस्रजाम् ।
चयं दधानामनिलस्य रंहसा
धुतं पताकानुकृतानि बिभ्रतम् ॥ ५० ॥

विवेश तामञ्जलिबद्धसंपदा
मुहुर्मुखेन्दोरुदयेन सर्वतः ।
नरेन्द्रसूनुर्मुकुलानि कल्पयन्
जनस्य हस्तारुणपङ्कजानि सः ॥ ५१ ॥

गुरूनपृष्ट्वैव कुमारमीक्षितुं
जवेन वातायनमीयुरङ्गनाः ।
न ता न सत्यो न च मूढवृत्तय-
स्तथाहि वंशस्य रघोर्विनीतता ॥ ५२ ॥

रराज वातायनसन्ततिर्वृता
विलोलनेत्रैर्वनितामुखाम्बुजैः ।
तता विनीलोत्पलपत्रसंपदा
सरोजिनी तिर्यगिव व्यवस्थिता ॥ ५३ ॥

---

49 C. स्फुरत्पताका°, D. चलत्पताका° for भ्रमत्पताका°.

50. D बिभ्रत for बिभ्रतम् We with A. B. C.

51 B C. नृपेन्द्रसूनु for नरेन्द्रसूनु

52 B रयेण, C. तुरेण for जवेन

दधौ द्युतिं जालगवाक्षसङ्गिनी
नितम्बिनीनां चलदृष्टिसन्ततिः ।
ततेव पङ्केरुहनालजालके
परिस्फुरन्ती शफरीपरम्परा ॥ ५४ ॥

पदं पुरन्ध्यामविशुष्कयावकं
समर्पयन्त्यामविलम्बिविक्रमम् ।
बभूव सोपानविमर्दसंभवः
स्वराग एवाङ्घ्रितलस्य यावकः ॥ ५५ ॥

कयाचिदालोकपथं मुखाकुलं
समेत्य घर्मस्रुतपत्रलेखया ।
सखीकपोलाहितगण्डभागया
कृतस्तदीयेऽपि मुखे विशेषकः ॥ ५६ ॥

प्रसाधनव्यापृतयाऽपि रामया
प्रदेशिनीपर्वविकृष्टकर्णया ।
उपाययेवामकरस्थपत्रया
रयेण वातायनजालमन्यया ॥ ५७ ॥

द्रुतप्रयाणश्लथकेशबन्धना
सघर्मवारिस्रुति बिभ्रती मुखम् ।
श्रमातुरोरुद्वयमन्थराऽपरा
ययौ सपत्न्याः परिशङ्कनीयताम् ॥ ५८ ॥

---

56. C. °गङ्गभागया for °गण्डभागया A B कृतं तदीयेऽपि मुखे विशेषक for कृतस्तदीयेऽपि मुखे विशेषक

57. D. सुमण्डनव्यापृतया for प्रसाधनव्यापृतया. C. . बालया for रामया. C त्वरैण, D. जवेन for रयेण.

58. D. सपत्न्या for सपत्न्याः.

निताम्तमेकीकृतगण्डभागयो-
र्भृशाल्पवातायनयातमन्ययोः ।
विभासुर कुण्डलमेकमेव तद्
मुखद्वयं मण्डयति स्म रामयोः ॥ ५९ ॥

विधाय काचित्प्रथमं तु लज्जया
प्रियोपभुक्ताधरमर्धलक्षितम् ।
प्रयाति दूरं नृपतौ दिदृक्षया
चकार वातायनबाह्यमाननम् ॥ ६० ॥

अतिष्ठदेका कुचयुग्मसंपदा
निरुध्य वातायनमुन्नतस्तनी ।
सखीजनो यत्कुशमध्यभागतः
पताकिनीमन्तरमाप वीक्षितुम् ॥ ६१ ॥

निधाय काचित्तनयं तनदरी
विशालवातायनदेहलीतले ।
अकारयत्पङ्कजकोशकोमलं
महीभुजे बालकमञ्जलिं बलात् ॥ ६२ ॥

---

59. D. reads the following for the last two lines -मुखद्वय कुण्डल-मेकमेव तत् प्रभासुरं मण्डयति स्म रामयो ॥ Agreeing with the Sinhalese edition. C. D. प्रभासुरं for विभासुर

60. C प्रियेण दृष्टाधरं for प्रियोपभुक्ताधरं D अर्धनिहृतं for अर्धलक्षितं C. निनाय for चकार. D. वाह्य for बाह्यं

62 A. विशालवातयनदेहलीतले, B विभूषिवातायनदेहलीतले, C. प्रसह्य वातायनदेहलीतले, D. प्रसह्य वातायनदेहिनीतले We with A 'कोष' for 'कोश'.

नृपः सुमित्रातनयो वधूरिति
प्रियाजने निर्दिशति स्वयं करैः ।
तलप्रभापाटलभागभागिनो
नखांशुजाला अपि चेरुरम्बरे ॥ ६३ ॥

अशक्नुवन् वधयितुं नृपात्मज
वधूजनोऽधृष्टतया जयेन तम् ।
पदं विधत्स्वाविधवाजनोचिते
पथीति पत्न्यै गिरमाशिषं जगौ ॥ ६४ ॥

नरेन्द्रसेना विविशुः समुद्रगाः
विशुद्धतोया इव यत्समन्ततः ।
महार्णवस्येव न तस्य तत्कृतो
बभव पूरश्च न चातिरिक्तता ॥ ६५ ॥

द्विधागतं द्वारमुपेत्य तद्बलं
नृपाङ्गनस्योभयभागसंश्रितम् ।
निबध्यमानाञ्जलि शासिता भवो
दृशाऽनुगृह्णन् स विवेश मन्दिरम् ॥ ६६ ॥

देशं युधाजिति जितं तनुजे तपोऽर्थी
विन्यस्य केकयपतिर्विपिनं विविक्षुः ।
दूतेन तेन तनयं दुहितुर्दिदृक्षुः
कालस्य कस्यचिदथेन्द्रसखं ययाचे ॥ ६७ ॥

---

63 A. B. दर्शयति for निर्दिशति

64 B C अधृष्णुवन् for अशक्नुवन् C. राज्ञै for पत्न.

65. C नृपेन्द्रसेना for नरेन्द्रसेना

66. B. C. नृपाङ्गणस्य for नृपाङ्गनस्य

अथ स युधाजिति स्वविषयं सति नीतवति
प्रथितगुणे गुणप्रचयलाभरतं भरतम् ।
इतरसुताहितप्रियशताहततद्विरह-
प्रभवशुचोऽनयन्नयशुचिर्दिवसान् ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमार-
दासस्य कृतौ प्रस्थानवर्णनो नाम नवम. सर्ग. ॥

दशमः सर्गः

ततो नयेन नयतो राज्यं राजीवचक्षुषः।
तस्य शक्रसमानस्य समानामयुतं ययौ ॥ १ ॥
अथालक्ष्यत तद्देहे काठिन्यरहितत्वचि।
पलितं विस्रसावल्लीपुष्पहास इव क्वचित् ॥ २ ॥
पलितच्छद्मना दोषा सर्वकालसमुन्नते।
जरसा शिरसि स्पृष्टे न विषेहे महारथः ॥ ३ ॥
आरोप्यान्यतरेद्युः स्वमङ्कं नाथो भुवः कृती।
समासीनः समज्यायां ज्यायांसं सुतमब्रवीत् ॥ ४ ॥
मामियं प्राणनिर्याणवैजयन्ती पुरःसरी।
रक्ताक्षवाहनादेशदूती संसेवते जरा ॥ ५ ॥
जरसा तात नोऽङ्गानि स्पृहा कामेषु निर्विदा।
शैथिल्यमुपनीतानि तुल्यमेव शनैः शनैः ॥ ६ ॥
कालेन शिरसि न्यस्तैः श्वेतकेशशिताङ्कुशैः।
निवर्तन्ते हि कामेभ्यो भद्रा राघवदन्तिनः ॥ ७ ॥

---

1. C. इत्थं for ततः B. शक्रोपमेयस्य, C. शक्रोपमानस्य for शक्रसमानस्य.

2. B. तदादृश्यत, C. तदालक्ष्यत for अथालक्ष्यत.

3. D. जरया for जरसा. B. C. नो for नः. D विसेहे for विषेहे Agreeing with the Sinhalese edition. But the form is incorrect. A. महाभुज. for महारथः.

4. C. वशी, D. बली for कृती. We with A. B.

5. C. °केतुमाला for °वैजयन्ती. B. C. रक्ताक्षवाहनादेशदूतिका सेवते जरा for रक्ताक्षवाहनादेशदती संसेवते जरा.

6. A. B. C. जरया जात for जरसा तात. [A. जरसा for जरया].

7. A. B. वीरा राघवकुञ्जराः for भद्रा राघवदन्तिनः.

उभे वक्षसि वश्यानां तिष्ठतो रक्तकर्कशे ।
यौवने वनिता वल्कसन्ततिर्वार्धके च नः ॥ ८ ॥

न जिष्णुः कृतशस्त्रो यो यश्चाढ्यो यज्ञनिस्पृहः ।
कामी यश्च जरन्नेते क्षत्रवंशेषु कत्रयः ॥ ९ ॥

पादशेषेऽपि वैराग्यं न यस्य पुरुषायुषे ।
कीदृशी लक्ष्यते तस्य जनस्य हृदयालुता ॥ १० ॥

नातिविस्रसया भिन्ने देहे ना तप्यते तपः ।
इतरत्र चिरं जीर्णे तपस्यायां हता गतिः ॥ ११ ॥

मन्दशक्तीन्द्रियश्श्योतल्लालाविच्छुरिताधरः ।
अस्फुटस्मृतिचेष्टाभिर्बालव्रतमिवाचरन् ॥ १२ ॥

मृणालवलयच्छेदतन्तुजालसमत्विषः ।
यौवनोद्दाहभस्मेव दधानः पलितच्छटाः ॥ १३ ॥

जीविते जीर्णवयसः प्रत्याशा मे मुमूर्षतः ।
तिर्यग्विकम्पितैर्मूर्ध्नो नास्तीति प्रथयन्निव ॥ १४ ॥

दन्तकुन्तशतैरुग्रैर्मृत्योः संकटमाननम् ।
प्रवेष्टुमिव बिभ्राणः कायसंकोचखर्वताम् ॥ १५ ॥

---

8. B यौवने वनिता नश्च वार्धक्ये वल्कसंहति, C. यौवने वनितास्माक वार्धक्ये वल्कसन्तति for यौवने वनिता वल्कसन्ततिर्वार्धके च न .

9. A B धृतशस्त्र for कृतशस्त्र A, B. अपि for य.. A. B यागनि स्पृह for यज्ञनिस्पृह C क्षात्रवंशेषु for क्षत्रवंशेषु.

10. D. पुरुषायुषि यस्य न for न यस्य पुरुषायुषे. Agreeing with the Sinhalese edition.

11. D देहे भित्ते for भित्ते देहे. Agreeing with the Sinhalese edition.

12. C °श्श्योतलाला° for °श्श्योतल्लाला°. Agreeing with the Sinhales edition. C. °विस्फुरिताधर for °विच्छुरिताधर.

15. D. देहसंकोचहस्वताम् for कायसंकोचखर्वताम्.

बिभ्रदातङ्कनिर्मासव्यक्तलक्ष्यसमुद्गमाः ।
वीचीरिव जरानद्याः पर्शुकास्थिपरम्पराः ॥ १६ ॥
निर्दन्तत्वादसंस्कारं मोहान्मुष्टिन्धयो यथा ।
मिथोऽशंसितमस्पष्टं वदन्नम्बूकृतं वचः ॥ १७ ॥
भिन्नभ्रुवमुदस्ताश्रां किञ्चित्कम्पितमस्तकाम् ।
नम्रो गद्गदितालापामनुनेतुं जरामिव ॥ १८ ॥
वार्धक्ये धर्मतो मूढः स्वदेहवहनेऽपि सः ।
विधित्सन्नप्यशक्तिष्ठस्तपः कीदृग्विधास्यति ॥ १९ ॥
यतो यातुस्तपस्यायामरण्ये वसतिं त्वया ।
मा जन्यश्रप्रवर्षेण प्रत्यूहो मे विरागिणः ॥ २० ॥
अनुशिष्टिः प्रकृत्यैव भद्रे भवति कीदृशी ।
मनसः प्रीतये स्नेहकातरस्य निगद्यते ॥ २१ ॥
औदासीन्यं यतः शत्रुरुदासीनश्च मित्रताम् ।
मित्रं भक्तौ दृढत्वं च याति तद्वक्तुमर्हसि ॥ २२ ॥
यो येन वाञ्छति ख्यातिं लोकसंग्रहकामिना ।
न तस्य निन्दनीयं तच्छ्रुतामप्यनिच्छता ॥ २३ ॥
वृत्तिः शुभकरी साम्नो नये स्वपररञ्जनी ।
आयःशूलिकतेत्याहुर्न तां निष्णातबुद्धयः ॥ २४ ॥
जिघांसुभिरपि प्राज्ञैः प्रयोक्तुं साम साम्प्रतम् ।
रञ्जयन्ति मृगान्गीतैर्बिभित्सन्तो मृगाविधः ॥ २५ ॥

---

18. A B. C उदस्तारां for उदस्ताश्रां

20. A B read the following for the first line of our text:—यतो यातुस्तपस्यायै कानने वसतिं त्वया.

21. D. प्रकृत्येव for प्रकृत्यैव C. समुच्यते for निगद्यते.

25 C. प्रज्ञै.. for प्राज्ञैः. D. मृगायवः for मृगाविधः. Agreeing with the Sinhalese edition.

साम शाठ्यं जनो वेत्ति दानादत्यन्तवर्जितम् ।
तत् सामौशनसं साधु युक्तं दानस्य मात्रया ॥ २६ ॥
मा दा रहितसंमानं त्यक्त्वा सत्कारसामनी ।
वित्तं विश्राणितं नीतौ कृतिनो दूषितं विदुः ॥ २७ ॥
शत्रुगृह्येण दुर्धर्ष शत्रुं नेता निहन्त्यथ ।
घनेनेव स्फुलिङ्गार्चिःप्रावृतं पिण्डमायसम् ॥ २८ ॥
उपजापहृतस्वामिस्नेहसीम्नि पराश्रयम् ।
मौले वाञ्छति मेदिन्याः पत्युः पातो न संशयः ॥ २९ ॥
इतरोपायदुःसाध्ये चण्डदण्डो महीपतिः ।
अदुष्टायत्यसौ नीतेरश्नाति विपुलं फलम् ॥ ३० ॥
अव्याहति न शक्या गौर्विना दण्डेन रक्षितुम् ।
इति प्रत्येति मुग्धोऽपि बल्लवः किमु राजकम् ॥ ३१ ॥
क्षोणिपतिः पतत्याशु जराक्रान्त इव ध्रुवम् ।
त्यक्तदण्डः पदं वाञ्छन्नगृहीतजगत्करः ॥ ३२ ॥
इत्थं युक्तिमुपायानां कुर्वाणस्य चतुष्टयीम् ।
व्रजतीन्दुप्रभागौरं परैरक्षय्यतां यशः ॥ ३३ ॥

---

26. B. C सम्यग्युक्तं for साधु युक्तं

27. A. B C हित्वा for त्यक्त्वा D द्रव्यं for वित्तं C. द्रविणं दापितं for वित्तं विश्राणितं.

28. C. निहन्त्यथो, D निहन्त्यत for निहन्त्यथ

29. C. पात पत्युरसंशयं for पत्यु पातो न संशय

30. C चोग्रदण्ड for चण्डदण्ड D ध्रुव पति for महीपति

31. C. अव्याहतं for अव्याहति C D मूढोऽपि for मुग्धोऽपि D. वल्लव for बल्लव

32 C. क्षमानाथः, D क्षोणिनाथ for क्षोणीपति B स्वयम् for ध्रुवम् D. मृष्टदण्ड for त्यक्तदण्ड

33 B C एवम् for इत्थम्

शूरं पुरुषसारज्ञं नीतौ पटुमलम्पटम्
सम्यग् संरक्षिताः कोशैर्वर्धयन्ति नृपं प्रजाः ॥ ३४ ॥

नीचैः पदं लम्भनीयो गुण्योऽप्यन्वयवर्जितः ।
रत्नाढ्यमपि कुर्वीत मूर्ध्नि कः पादमण्डनम् ॥ ३५ ॥

मूर्खो वर्ज्यः कुलीनोऽपि मातङ्ग इव भभजा ।
गुणैः कैरप्यविख्यातो वंशेनैव विभावितः ॥ ३६ ॥

तद्युक्तमुपधाशुद्धमन्वयेन गुणेन च ।
साचिव्यं लम्भयन् मौलं न प्रमाद्यति भूपतिः ॥ ३७ ॥

यस्मिन्कृत्यानुरोधेन सौहृदं प्रतनोति यः ।
स तं त्यजति कृत्यान्ते तीर्णतोय इव प्लवम् ॥ ३८ ॥

यौ तु निष्कारणामुक्तस्नेहपाशौ सुहृत्तरौ ।
मृत्युनैव तयोर्भेदो देहजीवितयोरिव ॥ ३९ ॥

दण्डद्रविणदुर्गैकसङ्गी रक्षति भूपतिः ।
आत्मानमेव सततं किमु रक्षत्यदो जगत् ॥ ४० ॥

---

34 D. reads the following for the first line —नीतौ पुरुषसारज्ञं पटु शरमलम्पटं.

35. C लम्भनीय पदं नीचै for नीचै पदं लम्भनीय. D को मूर्ध्नि पादमण्डनम् for मूर्ध्नि क पादमण्डनम्

36 A. B. transpose the first and the second lines

37. C उपवाशन्यं for उपधाशुद्धं C. मन्त्रित्वं, D मन्त्रिनां for साचिव्यं.

38 A. C. read the following for the first line of our text.—यत्र कृत्यानुरोधाद्य सौहृदं वितनोति च

39 B. C. नैसर्गिकावद्धस्नेहपाशौ for निष्कारणामुक्तस्नेहपाशौ

40 Three of our Mss omit the second line of this verse. We have adopted the third Pa'da from the Sinhalese edition of Principal Dharma'rama C reads किमु रक्षत्यदो जगत्, and omits the third Pa'da. Printed editions read असौ for अद.

इति प्रकृतिवर्गादिनिर्णयेषु नयाश्रयः ।
क्षपितान्तर्बहिःशत्रुः शाधि साधु वसुन्धराम् ॥ ४१ ॥

इत्थं वादिनि राजेन्द्रे रामो मौनमधिश्रितः ।
ववर्ष हृदयं बाष्पैः शोकेन हृदयाविधा ॥ ४२ ॥

ततो वज्रासने भद्रं निधाय निधिः श्रियः ।
निर्भरीकृतसंभारः प्राभिषिक्तो महीपतिः ॥ ४३ ॥

रुरुधे पृष्ठसंविष्टग्रन्थिमन्थरयातया ।
स्मारयित्वा वरा वीरं राज्यं मन्थरय तया ॥ ४४ ॥

आदिदेश ततो वस्तु वनषु वनजेक्षणम् ।
चतुर्दश दशग्रीवशत्रुमिन्द्रसमः समाः ॥ ४५ ॥

अनिन्द्यजानिनारूढो निर्जगाम रथः पुरः ।
कृतप्रस्थानसौमित्रिः स्फुरत्केतुरथो पुरः ॥ ४६ ॥

अश्रुभिर्हृदयं सीता निजमेव न केवलम् ।
चकारार्द्रं जनस्यापि प्रेक्षितस्य वनाध्वनि ॥ ४७ ॥

जगन्नेत्राभिरामस्य रामस्य रहितागसः ।
शक्रस्य त्यागिनं देवं घृणयेवासवो जहुः ॥ ४८ ॥

न्यवर्तत परित्यज्य क्षत्ताथ क्षत्रियत्रयम् ।
ऊढाश्रु वलितग्रीवं चिरं तेनैव वीक्षितः ॥ ४९ ॥

---

42 A B C. read the following for the first line of our text —इत्थं वादिनि राजेन्द्रौ राघवो मौनमास्थित [C कुमार for राघव]

44 A B ततो भद्रासने भद्र for ततो वज्रासने भद्रं.

47 C अस्य for अपि C प्रेक्षकस्य for प्रेक्षितस्य

49 C D तेनैव वीक्षितश्चिरं for चिरं तेनैव वीक्षित Agreeing with the Sinhalese edition

द्वित्राण्येव रथं त्यक्त्वा पदान्याधाय निःसहा ।
येयमन्यत्क्रियद्दूरमिति पप्रच्छ मैथिली ॥ ५० ॥

रामहस्तस्थशाखाग्रकल्पितातपवारणम् ।
प्रस्थानमभवत्तस्यास्तदग्रेसरलक्ष्मणम् ॥ ५१ ॥

इक्षुशाकटशालेयक्षेत्रानुत्तरकोसलान् ।
ययुर्भागीरथीतीरं पश्यन्तः सोत्पलाम्भसः ॥ ५२ ॥

अथानासाद्य कालिन्दीमुल्लङ्घ्य सरितं दिवः ।
भारद्वाजाश्रमं पुण्यं चित्रकूटस्य चाध्वनः ॥ ५३ ॥

चिह्नं नदनदीदेशैरुक्त्वा वृक्षक्षमाधरैः ।
राजन्यभोगिने याते राघवोऽपि गुहे गृहम् ॥ ५४ ॥

रूपत्न्यौ सरितां पत्युः सुमित्रात्मजधीवरैः ।
चित्रकूटमकूटज्ञः प्रीतः प्रोत्तारितो ययौ ॥ ५५ ॥

ततः सीतामुखाम्भोजभ्रमरत्वे कृतस्पृहम् ।
नष्टैकदृष्टिमस्त्रेण बलिपुष्टं चकार सः ॥ ५६ ॥

ततः प्रतीकसघाटो वीरः केकयवंश्यजः ।
बिभ्रच्छोकद्विगुणितं श्रमं रामाश्रमं ययौ ॥ ५७ ॥

राजघो निर्घृणः कश्चित् संप्राप्त इति साधवे ।
कथ्यतामिति तद्वाक्यं द्वारि शुश्राव राघवः ॥ ५८ ॥

अनुज्ञातोऽनुजस्तेन पर्णशालामथाविशत् ।
द्वारबन्धातिरिक्तेन किञ्चित्तिर्यक्कृतोरसा ॥ ५९ ॥

---

50. C D हित्वा for त्यक्त्वा A. पेशला, B पेलवा, C. कोमला for नि सहा

52. C. °कोशलान् for °कोसलान् A. B ययुस्ते जाह्नवीतीर for ययुर्भागीरथीतीरं.

53 C D. भरद्वाजाश्रमं for भारद्वाजाश्रमं

57. C ततस्त्वनीकसंघाट for तत प्रतीकसंघाट

59. C. द्वारबन्धातिरेकेण for द्वारबन्धातिरिक्तेन

भरतः शोकसंतप्तो राममादाय पादयोः ।
आर्येत्युक्त्वा सकृद्दीनः पुनर्नोवाच किञ्चन ॥ ६० ॥
ततः श्रुत्वा गुरोरन्तं स दुःखेन हृदिस्पृशा ।
साभिषेकमिवास्रेण चक्रे कर्मौर्ध्वदैहिकम् ॥ ६१ ॥
शपमानामथ स्वस्मै कैकेयीं भूतिनिःस्पृहाम् ।
गर्हन्तं भरतं वक्तुं रामस्तत्र प्रचक्रमे ॥ ६२ ॥
न स्मरामि गुरोराज्ञां ज्ञात्वा जातु विलङ्घिताम् ।
न सदृक्षं हि नो हन्तुं तातस्य समयं यतः ॥ ६३ ॥
समयस्य गुरोरिन्द्रलोकस्थस्य विलङ्घने ।
बुद्धिश्च निर्विशङ्कैवं पुनर्मा जनि तावकी ॥ ६४ ॥
पूजनीया च ते देवी पत्युः सत्यानुपालिनी ।
दूषयिष्यति पूज्येषु पूजावैमुख्यमायतिम् ॥ ६५ ॥
स्वयं कृतेन दोषेण येन यो लज्जते गुरुः ।
तेन तत्सन्निधौ तद्वानन्योऽपि न च निन्द्यताम् ॥ ६६ ॥
इति व्याहृत्य नम्राय ददौ दीनाय पादुके ।
घर्मे मर्मांविधि मरौ वारि वारीष्यते यथा ॥ ६७ ॥
द्विधाकारमिव ज्यायान् भरतं हृदयं चिरम् ।
दर्शयन्तं परिष्वङ्गप्राप्तसान्त्वं व्यसर्जयत् ॥ ६८ ॥

---

60. A. B. तातेत्युक्त्वा for आर्येत्युक्त्वा.

61. C. अश्रेण for अस्रेण. D और्ध्वदेहिकं for और्ध्वदैहिकं.

62. D प्रोक्तु for वक्तुं C रामश्चापि, B [illegible]ोऽत्र for रामस्तत्र. A hiatus in A. between वक्तुं and प्रचक्रमे.

64. C. तु for च

65. C हि for च. B. C. सन्वानुपालिनी for सत्यानुपालिनी.

68. A. C. °शान्त्वं for °सान्त्वं.

ततस्तं त्यजता शैलं विराधो रावणारिणा ।
दृष्टस्तनूनपादर्चिर्बभ्रुः पञ्चवटीपथे ॥ ६९ ॥
हरन्तमथ वैदेहीं विनिहत्य निशाचरम् ।
भविष्यदिव संक्षिप्य कथाया वस्त्वदर्शयत् ॥ ७० ॥
पञ्चवट्याश्रमे रम्ये रङ्गत्सारङ्गशावकैः ।
वृतेऽथ ववृते तस्य वासो वासववर्चसः ॥ ७१ ॥
अथ रामं तृषस्यन्ती प्रपेदे नैकसीसुता ।
इव चिन्ता दरिद्रस्य स्थूललक्षं नरेश्वरम् ॥ ७२ ॥
चकर्त नासिकां क्रुद्धः सीताविद्रवणादथ ।
लक्ष्मणस्तन्मुखाम्भोजकर्णिकां कृपया समम् ॥ ७३ ॥
भ्रातृद्वये तदाहूते क्षुरप्रप्रकरं बलम् ।
शस्त्रैर्वर्षयति क्षिप्रमपावरिष्ट राघवौ ॥ ७४ ॥
अदीधपत गृध्राणां व्रातमेकधनुर्धरः ।
सत्यव्रतोऽसृजो धारां खरदूषणयोर्युधि ॥ ७५ ॥
दम्भाजीवकमुत्तुङ्गजटामण्डितमस्तकम् ।
कञ्चिन्मस्करिणं सीता ददर्शाश्रममागतम् ॥ ७६ ॥

---

69 D विरोध for विराध

70. B C विनिष्पिष्य for विनिहत्य

72 A. निकषासुता, C. नैकषासुता, D कै[probably a wrong reading for नै] कसीसुता for नैकसीसुता D स्थूललक्ष्य for स्थूललक्षं C नृपेश्वरम् for नरेश्वरम्

73 A. B चिच्छेद for चकर्त D °विद्रावणात् for °विद्रवणात्

74. D reads the following for our text —वर्षयति तदाहृते क्षुरप्र प्रकरं बलम् । शस्त्रैर्भ्रातृद्वये क्षिप्रमपावरिष्ट राघवौ Agreeing with the Sinhalese edition.

76. A. द[दा ?]ण्डाजिनिकं, D दम्भाजीविक for दम्भाजीवकं We with B. C. Excepting A. none of our Mss. or even the printed editions support this reading. We can, therefore, hardly believe in the genuineness of this solitary varient given by a single Ms

मृगव्याहृतराजन्यो वर्णलिङ्गी निशाचरः ।
उग्ररूपो निजं घोरं रूपं प्रादुरबीभवत् ॥ ७७ ॥
दशानामस्य शिरसामुग्रतेजस्कमाश्रयम् ।
पश्यन्ती मैथिली भीत्या रूपधेयमकम्पत ॥ ७८ ॥

प्रदीपमिव तं द्रष्टुं नात्यासन्नं शशाक सा ।
असोढमरुतं तेजःपरिष्कृतदशाननम् ॥ ७९ ॥

रामारत्नमसौ रामनामाक्रन्दादिदं वचः ।
जगाद जगदीशस्य क्षेपदुष्टं क्षपाचरः ॥ ८० ॥
सारङ्गाक्षि शरस्तस्य केवलं तु खरे खरः ।
दूषणे दूषणो भद्रे न त्रिलोक्या विभौ रणे ॥ ८१ ॥

लब्धाभया बलनिरीक्षणदौहृदेन
द्वारे स्थिता निजपुरप्रवरस्य सिद्धाः ।
दृष्टा मया सुरपुरं व्रजता कटाक्षै-
रैरावणद्विपगतेन सहासगर्वम् ॥ ८२ ॥

अन्यायितोऽहमहमप्यनुवृत्य सेवां
निर्जीविको मम हृतं भवनं पिशाचैः ।
इत्युन्नदन् सुरगणः सह लोकपालैः
राजाङ्गने भ्रमति मत्प्रतिहारमेत्य ॥ ८३ ॥

77 A. B वर्णलिङ्गी for वर्णलिङ्गी C क्षपाचर for निशाचर .

79 A. B C तेज परिष्कृतदशाननम्, D. तेज परिष्कृतदशाननम् We with A B. C The reading of the Ms. D agrees with the Calcutta edition

81. A. B मयि for रणे.

82. B °दौर्हृदेन, C. °दोहदेन, D. °दोहलेन for °दौहृदेन D. ऐरावत° for ऐरावण°

83 D राजाङ्गणे for राजाङ्गने.

स्पष्टोत्पिष्टबृहत्त्रिविष्टपवलं बाहुं वहुक्षोभित-
क्ष्मापातालतलं तलेन दलितश्वेताचलेन्द्रं मम ।
नो वाञ्छत्युपधानभूतमवले धन्या सुरस्त्रीषु का
तल्पेऽनल्पपिकल्पजल्पमधुरक्रीडारसे सेवितुम् ॥ ८४ ॥

उर्वश्या परिवीजनेषु मधुरं नृत्यं यथा लीलया
तन्वन्त्या जितशारदेन्दुकिरणच्छायोल्लसच्चामरम् ।
आसज्य स्वयमङ्गदस्य शिखरे निर्मोकयन्त्या पुनः
स्नेहस्विन्नविवेपमानकरया सोऽयं भुजः स्पृश्यते ॥ ८५ ॥

एकस्मिन्शयने मया मयसुतामालिङ्ग्य निद्रालया-
मुन्निद्रं शयितेन मच्चरणयोः संवाहनव्यापृता ।
पादाग्रेण तिलोत्तमा स्तनतटे सस्नेहमापीडिता
हर्षावेशसमर्पितानि पुलकान्यद्यापि नो मुञ्चति ॥ ८६ ॥

अक्षान् दीव्यति दानवेन्द्रसुतया सार्धं स्मरार्ते मयि
क्रीडायत्नपरिश्रमः पण इति श्रुत्वा गतासङ्गताम् ।
मत्तो मन्मथवस्तुसंहितविधौ वृद्धौ विवृद्धस्पृहा
द्यूतं कारयति प्रयोगचतुरा रम्भोरु रम्भाह्वया ॥ ८७ ॥

सर्वस्वर्गवराङ्गनाधृतिहृति प्रेमप्रधानं मयि
त्रैलोक्याधिपतौ निधाय हृदयं याया जगत्पूज्यताम् ।
नारीमाश्रयसंपदेव नयति श्रेयस्करीमुन्नतिं
मान्या मानिनि कस्य धूर्जटिजटाजुष्टा न जह्नोः सुता ॥८८॥

---

84. D °दृहत् for °बृहत्. C. °त्रिपिष्टप° for °त्रिविष्टप.°

85. A B. omit लीलया.

86 A B °समुत्थितानि for °समर्पितानि.

87. C. अक्षैर्दीव्यति for अक्षान् दीव्यति. D. प्रणयति for पण इति. Agreeing with the Sinhalese edition.

88. C गच्छे for यायाः.

हस्तौ पल्लवकोमलौ करयुगेनादाय वासः शनै-
रन्येन व्यपनीय पाणियुगलेनामृश्य काञ्च्यास्पदम् ।
मय्यालिङ्गति बाहुभिः सुबहुभिः शैवैर्विलक्षस्मित-
ज्योत्स्नासेकमनोहराधरपुटं वक्त्रं स्वयं दास्यसि ॥ ८९ ॥

इत्युक्त्वादाय रक्षःपतिरवनिसुतामुत्पुतो मीनजालै-
श्चित्रं व्योमाम्बुराशिं घनपवनरयास्फालगुञ्जद्घनोर्मिम् ।
पोतेनेव प्रकम्पध्वनिनिवहमसौ बिभ्रता पुष्पकेण
स्फूर्जत्सीतेन यात्रामनुपहतजवव्यापिनीमाललम्बे ॥ ९० ॥

॥ इति जानकीहरणे महाकाव्ये सिंहलकवेरतिशयभूतस्य कुमार-
दासस्य कृतौ सीताहरणो नाम दशमः सर्गः ॥

NOTES.

CANTO I.

जानकीहरणम्, Expl —जानक्याः हरणं वर्ण्यते यस्मिंस्तत् काव्यं, *i e.* जानकीहरणमधिकृत्य कृतं काव्यं जानकीहरणं, 'making the abduction of जानकी, Ràma's beautiful wife,' the subject of his poem *Cf* Pàni IV. 3 87. "अधिकृत्य कृते ग्रन्थे." An affix comes after a word in the 2nd case in construction, in the sense of, 'made in relation to any subject' when the thing made is a 'book' And the Vártika thereon, "लुबाख्यायिकाभ्यो बहुलम्" for the elimination of the *Taddhita* affix अण् A classical poem in twenty five cantos (the last ten are missing for ever) by Kumàradásа a poet of Ceylon. It is one of the Mahákávyas which is thus defined —सर्गबन्धो महाकाव्यं तत्रैको नायक सुर । सद्वंश क्षत्रियो वापि धीरोदात्तगुणान्वितः । एकवंशभवा भूपा कुलजा बहवोऽपि वा । शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते । * * * इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ॥ See also काव्यादर्श, Bibli Ind series, p 16 verses 14–19.

St. 1. आसीत् Construe अतिभोगभाराद् दिव अवन्यां अवतीर्णा दिव्या नगरीव समृद्धा पुरा पराध्यां क्षत्रानलस्थानशमी अयोध्येति पुरी आसीत्. अवन्यां, Expl —अवति, अव्यते वा इत्यवनी तस्यां, 'On the earth.' अतिभोगभारात्— Analyse अतिशयितो भोगानां भारस्तस्मात्, 'From excessive or extraordinary load or burden of (multifarious) articles of enjoyment.' दिव्या, Expl —दिवि भवा दिव्या, 'celestial.' 'Heavenly' क्षत्रानलस्थानशमी— Analyse क्षत्र अनल इव क्षत्रानल तस्य स्थानं या शमी वृक्षविशेष तद्वदिव, 'Like a S'amì tree, an asylum or abode of fire of क्षत्र race' वह्निवत् प्रदीप्तक्षत्रियाणा शमीवाश्रयभूता इत्यर्थः । The S'amí tree supposed to contain fire is a well known fact to be often met with in Sanskrit literature शम्या अग्न्याश्रयत्वं लोके सुप्रसिद्धं. Or it may be analysed as, यद्वा । क्षत्ररूपानलस्य क्षत्रियरूपवह्ने आश्रयभूतशमीरूपायोध्येति, 'Ayodhyá wearing the form of शमी which was an asylum or abode of the fire in the form of the क्षत्रिय race.' *Cf* R III. 9. "शमीमिवाभ्यन्तरलीनपावकां" समृद्धि Expl —संपूर्णा ऋद्धि समृद्धि, or सम्यगतिशयेनर्द्धि समृद्धिः 'Thorough or great prosperity.' अयोध्या *f* —The modern Oude. The capital of इक्ष्वाकु the founder of the solar dynasty and afterwards of almost all

kings of that line It is one of the seven sacred cities of the A'ryas They are —" अयोध्या मथुरा माया काशी कांचिरवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिका " The exact site of this ancient capital has not yet been discovered by the archæological surveyors The metre of this canto is उपजाति, a mixture of इन्द्रवज्रा and उपेन्द्रवज्रा It is thus defined —"अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता । इत्थं किलान्यस्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम " In the odd feet the ganas are —त त ज ग ग and in the even ज त ज ग ग अतिभोगभाराद् दिव अवन्यामवतीर्णा दिव्या नगरीव, 'Like a celestial city which had come down from heaven to the earth on account of excessive (or extraordinary) load or burden of (multifarious) articles of enjoyment, ' (i. e. thrown down under the unbearable load of various articles of enjoyment) समृद्ध्या पुरां परार्ध्या क्षत्रानलस्थानशमी अयोध्येति पुरी आसीत्,— ' There was a city of the name of अयोध्या, the most excellent of the towns by reason of its prosperity, resembling a शमी tree, an asylum or abode of the fire of the क्षत्र race'.

St 2 यत्—Construe यत्सौधभृंगारसरोजरागरत्नप्रभाविच्छुरित पौरांगनावक्त्रकृतावमान शशांको रोषाद् लोहितत्वं जगाम इव यत्सौध°—Analyse यस्या. अयोध्याया सौधानां उपरि ये भृंगारा कनकालुका तेषु (खचितानां) सरोजरागरत्नानां पद्मरागाणां प्रभाभि कान्तिभिः विच्छुरित', ' Overspread with splendour of rubies set on the golden pitchers placed on the terraces of its palaces '. पौरांगना°—Analyse पुरे भवा पौरास्तेषामंगनानां योषितां वक्त्रैर्मुखैः कृतोऽवमानो यस्य तथोक्त शशांक , ' Dishonoured or put to shame by the (exquisitely beautiful) faces of the ladies of the citizens'. यत्सौधभृंगारसरोजरागरत्नप्रभाविच्छुरित. पौरांगनावक्त्रकृतावमान शशांक रोषाद् लोहितत्वं जगाम इव—'Being slighted by (the transcending beauty of the) faces of the ladies of the citizens the moon, covered over (or overspread) with splendour of rubies set on the golden pitchers placed on the terraces of its palaces, became reddish-pale as if from anger' (i. e. with the feeling of jealousy).

St. 3 कृत्वापि—Construe समृद्ध्या सर्वस्य मुदं कृत्वा अपि कांचनतोरणस्थरत्नांशुभिर्भिन्नतमिस्रराशि या निशासु अभिसारिकाणां हर्षाय [पर्याप्ता] नाभूत् । अभिसारिकाणां—' To women who meet their lovers by assignation '. 'To women who go to meet their lovers or keep an assignation '. Expl.—अभिसरन्ति नर्क्तं प्रियपार्श्वं स्वेच्छया व्रजन्तीति. The word is thus defined —" या दूतिकागमनकालमपालयन्ती लौल्येन सा स्मरजरातिपिपासितेव । निर्याति वल्लभजनाधरपानलोभात् सा कथ्यतेकविवरैरभिसारिकेति । " " अभिसारयते कान्तं या मन्मथवशंवदा । स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका ". कांचनतोरण-

स्थरत्नाशुभि· Analyse कांचनस्य तोरणानि कांचनतोरणानि तत्रस्था ये रत्नाना अंशव तै, 'By means of the rays of jewels inlaid in golden-arches' भिन्नतमिस्रराशि —Analyse भिन्ना तमिस्राणां राशिर्यया, 'Dissipated the mass of darkness'. समृध्या सर्वस्य मुद कृत्वा अपि अभिसारिकाणा हर्षाय नाभूत्—'Though giving joy to every one by its prosperity, the city did not bring (complete) delight to the अभिसारिका, since it dissipated the mass of darkness by means of the rays of jewels inlaid in golden arches at (every) night'.

St 4. चीनाशुकै —Construe या अभ्रलिहां गृहाणां उदग्रशृगाग्रभागापहितै चीनांशुकै विटंककोटिस्खलितेन्दुसृष्टनिर्मोकपट्टैरिव बभासे. चीनाशुकै —Analyse चीनानां अंशुकानि चीनांशुकानि तै 'By reason of the pieces of silk-woven cloth of China' The Indian A'ryàs, it is reported, had an early communication with the Chinese, Arabs, Greeks and other foreign peoples The Commercial intercourse between these foreign countries and India can positively be traced to B C 1500 or even earlier' अभ्रलिहां—Analyse अभ्राणि लिहन्तीति अभ्रलिह तेषां, 'Sky-licking. उदग्र°—Analyse उदग्राणि च तानि शृंगाणि च तेषां अग्रभागेषु उपहितै, 'Placed on the foremost parts of the lofty summits' विटंक *m n.* Expl —विशेषेण टंक्यन्तेऽत्र। "टकिबन्धने" (चु प से) 'हलश्च' (३-३-१२१) इति घञ् Derived from टङ् (टंङ्) *vt* 10 U 'to bind' It means, 'Dove-cot,' 'a wooden aviary built on the top of a house,' (काष्ठादिरचितपक्षिगृहस्य), 'the loftiest point' विटंककोटि°,—Analyse विटंकानां कपोतपालिकाना कोटय ताभि स्खलितो य इन्दुश्चन्द्र तेन सृष्टा विसृष्टा निर्मोकपट्टा तै तादृशै, 'As it they were the stripes of cast-off skin abandoned by the moon which stumbled over the piercing points of the dove-cots' The idea of the moon being obstracted in his heavnley course by the loftiest points of sky-licking palaces is often met with in the Champûs, Mágha and other artificial poems. या बभासे—'The city shone forth with its sky-licking palaces, on the foremost parts of the lofty summits of which were fixed the pieces of silk-woven China-cloth, as if, they were the stripes of cast off skin abandoned by the moon which stumbled over the piercing points of dove-cots (built on them).'

St 5 दिदृक्षु Construe यत्खातहस सरसीमन्तर्दिदृक्षुर्वप्रमलंघ्यं समुदीक्ष्य दृढकोऽवकुञ्जभागच्छिदो भार्गवमार्गणस्य सस्मार ननं. अलंघ्यं Expl —लंघितुमशक्यं अलंघ्यं, 'Insurmountable' 'Impassable.' 'Difficult to be crossed' दिदृक्षु Expl —द्रष्टुमिच्छु दिदृक्षु, 'Wishing to see.' 'Longing to see' यत्खातहंस. Analyse यस्या खातस्य हंस यत्खातहंस 'A swan dabbling

in the moat.' दृढकौञ्च°—Analyse कौञ्चस्य कुञ्जभाग कौञ्चकुञ्जभाग । दृढश्चासौ कौञ्चकुञ्जभागश्च दृढकौञ्चकुञ्जभाग तस्य छिद दृढकौञ्चकुञ्जभागच्छिद, 'Breaking asunder the hard portion of the caves of the कौञ्च mountain.' कौञ्च or कौञ्च *m* 'A mountain, part of the Hima'laya range, situated in the eastern part of the chain on the north of Asam. भार्गवमार्गणस्य—Analyse भार्गवस्य परशुरामस्य मार्गण सायक तस्य तादृशस्य, 'An arrow of Paras'uráma' An object to सस्मार Mark the root स्मृ governing genitive object भार्गव, otherwise called परशुराम, was the son of the sage जमदग्नि, and was according to the legend the sixth incarnation of Vishnu While young he cut off the head of his mother Renuká at the desire of his father. While he was away from home his father was slain by the sons of Kártavîrya Paras'uráma, to avenge his father's unmerited fate, vowed to extirpate the Kshatriyas and "thrice seven time did he clear the earth of the regal race' He was afterwards defeated by Ráma and is believed to be still practising austerities on the Mahendra mountain Being jealous of Kártikeya he is said to have once pierced the क्रौञ्च mountain right through with his arrows. He is one of the seven men that come under the category of चिरजीविन् "अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषण । कृप परशुरामश्च सप्तैते चिरजीविन" यत्खातहंस सरसीमन्त-र्दिदृक्षुर्वप्रमलंघ्यं समुदीक्ष्य—'A swan, dabbling in the moat outside the city wished to see the lake lying within (it), but seeing that the rampart was hard to be crossed, thought of Paras'uráma's arrow breaking asunder the hard portion of the caves of the कौञ्च mountain'

St. 6. स्वबिम्बं—Construe यस्यां गृहाणां आदर्शभित्तौ ततं स्वबिम्बमालोक्य रथ्यासु कृतवन्ध्यघाता रदिन अरिद्विपानां मदामोदं प्रमाणं चक्रु स्वबिम्बं—Analyse स्वस्य बिम्बं स्वबिबिम्ब तत् 'One's own reflected image' 'Reflected shadow.' आदर्शभित्तौ—Analyse आदर्शवत् भित्ति आदर्शभित्ति तस्यां । यन्त्रा-दिकृत्रिमसाधनै निघृष्य आदर्शवत् संस्कृताया उपलभित्तौ, 'The smooth glossy stone-wall receiving reflected images like a mirror' The stones of the walls were given a high polish by rubbing their surface with sand-papers and such other means so as to receive reflected images on them. कृतवन्ध्यघाता —Analyse कृता वन्ध्यघाता येषां ते, 'Whose blows were made ineffectual or useless'. प्रमाणं—'An authoritative guide.' 'An authoritative standard' (इयत्ता). मदामोदं—Analyse मदस्य आमोद मदामोद तं, 'Diffusive perfume of the juice exuding from the temples of elephants when in rut.' For the

construction *Cf* R II 46. "अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखै शकलानि कुर्वन्" अरिद्विपानां—Analyse अरयश्च ते द्विपाश्च अरिद्विपा तेषां अरिद्विपानां प्रतिकुंजराणां, 'Of the hostile elephants' रदिन अरिद्विपानां मदामोदं प्रमाणं चक्रु, 'Having seen their own images reflected (*lit.* stretched on) in the mirror-like glossy walls of its mansions, the elephants, whose blows (to the hostile elephants) were made ineffectual, made the diffusive perfume of the rutting-juice of rival elephants an authoritative guide (for them) in the streets.' The elephants began to strike blows on their own images reflected in the glossy walls taking them to be the rival elephants. But when their blows turned ineffectual they thought there were no hostile elephants, because their own reflected images (which they took for real elephants) did not give out the diffusive perfume which generally exudes from the temples of such wild elephants

St 7. लग्नैकभागं—Construe यत्र सितहर्म्यशृंगे लग्नैकभागं मन्देन समीरणेन विकृष्य दीर्घीकृतं बालमृणालशुभ्रमभ्रं ध्वजकृत्यं करोति लग्नैकभागं—Analyse लग्न एकभागो यस्य तद् लग्नैकभागं, A portion ofwhich clung to or stuck to.' सितहर्म्यशृङ्गे—Analyse हर्म्यस्य शृंगं हर्म्यशृंगं। सित च तद् हर्म्यशृंगं च सितहर्म्यशृंगं तस्मिन् तादृशे, 'On the white top of a palace' बालमृणालशुभ्रं—Analyse बालं च तद् मृणालं च बालमृणालं तद्वत् शुभ्र, 'White like a fresh lotus' ध्वजकृत्यं—Analyse ध्वजस्य कृत्यं ध्वजकृत्यं, 'Office or function of a flag' यत्र अभ्रं ध्वजकृत्यं करोति—'Where a cloud, white like a fresh lotus, with a portion clinging to the white top of a palace, being dragged out by a gentle breeze and thus made long, performs the function of a flag.'

St 8. प्रवालशीर्षा—Construe यस्यां प्रवालशीर्षा मुक्तामयांगावयवा सुवर्ण वदनं वहन्त्य विधात्रा विहिता युवत्य वपुष प्रकर्षमाप्तु. प्रवालशीर्षा Analyse प्रवालं (प्रबालं) कमनीयकेशपाशयुक्तं शीर्ष मूर्धा यासां ता, 'Bearing on their head a charming band of hair' As applied to रत्न, प्रवाल means 'coral,' प्रवाला विद्रुमा शीर्षाणि यासां ता', 'Having their heads made of corals' i e having their heads decoarted with corals. मुक्तामयांगावयवा —Analyse मुक्तामया आमयेन रोगविशेषेण मुक्ता अंगावयवा प्रत्यवयवा अंगोपांगानि वा यासां ता, 'Having all their limbs free from disease,' or 'having all their limbs and minor limbs free from disease.' अंगाना पाणिपादादीनां अवयवा अंगुल्यादय तेषां रोगाभावे अंगानामपि नैरोग्यमापन्नं. As applied to रत्न, मुक्तामया मौक्तिकविकारा मुक्ताप्रचुरा वा अंगावयवा यासां ता, 'Having their limbs full of pearls' i. e having all their limbs decorated with pearls. सुवर्ण—Analyse शोभनो वर्णो यस्य तत् सुवर्ण,

सुवर्ण वदनं, 'Faces bearing a lovely complexion' As applied to रत्न, सुवर्ण वदनं means, 'golden faces' वपुष प्रकर्षमाप —'Secured bodily excellence' *Cf* R. III, 34. " वपु प्रकर्षादजयद्गुरुं रघु " युवत्यो रत्नैरिवाप्तुर्वपुष प्रकर्षम्—' The young women made by the Creator in this city, who were wearing heads on which were charming bands of hair, had all their limbs free from disease and possessed beautiful faces, attained bodily excellence like jewels.'

St 9 आलिंग्य—Construe तुंगं वडभीविटंकमालिंग्य पुष्करेषु विश्राणिता-' त्मध्वनि सितं शारदमभ्रवृन्दं यत्सौधकान्ते संविभागमिव वत्रे वडभावटक—Analyse वडभीना विटंको वडभीविटंक तं, ' The loftiest point of the top-room.' विश्राणितात्मध्वनि—Analyse विश्राणितो दत्त आत्मनो ध्वनि गार्जितं येन तत् ' Have them thunders transferred to' यत्सौधकान्ते —Analyse यस्या सौधानां कान्ति यत्सौधकान्ति तस्याः तथोक्तायां, ' The brightness or splendour of its palaces' शारदं Expl —शरद इदं शारदं, ' Autumnal'. अभ्रवृन्दं—Analyse अभ्राणां वृन्दं अभ्रवृन्दं, ' A cluster of clouds' वत्रे—Derived from the root वृ *cf* 9 A. सेट्, ' To accept ', ' to resort to ', ' to assimilate into &c ' शारदमभ्रवृन्दं यत्सौधकान्ते संविभागमिव वत्रे—' Having clasped the lofty points of the top-rooms of palace-turrets, and having transferred (or mixed) its thunders to those of the पुष्कर drums, the white autumnal cluster of clouds assimilated (*lit.* accepted or resorted to) itself, as it were, into a portion of the beauty of the palaces.' The poet means to say that the clouds themselves became a decorated upper story of the palaces at Ayodhyá.

St 10. आसन्न°—Construe यस्यां आसन्नजीमूतघटासु कांचनपिंजरासु पताकासु तता विद्युन्निभा विवृत्ति शिखिनामुदयं तोषं मुहुस्ततान आसन्नजीमूतघटासु-Analyse आसन्ना समीपवर्तिनो जीवनानां मूता बंधा आसन्नजीमूता निकटभागता मेघास्तेतां घटा पंक्तयो यासु तासु आसन्नजीमूतघटासु, ' To which the lines of clouds had come close.' विद्युन्निभाविद्युत्समा, 'Like the flash of lightning ' काचनापिंजरासु—Analyse कांचनवत् पिंजर पीतरक्तवर्णा यासा ता तासु तथोक्तासु, Having a tawny-brown (or reddish-yellow) colour like that of gold' विवृत्ति.—' Turning round,' 'revolution,' 'rolling' ततावितृता, 'Spread on, 'stretced,' 'manifested.' पताकासु तता विवृत्ति शिखिनामुदयं तोषं ततान—' In which the rolling to and for that is often manifested on the golden tawny-brown flags with (a back-ground of) the lines of clouds impending near, excessively heightened the joy of peacocks.'

St 11. यत्र—Construe यत्र क्षतोद्बृंहिततामसानि रक्ताश्मनीलोपलतोरणानि निशासु भ्रमतो नारीजनस्य विभाभि कोषप्रमोदौ विदधु क्षतोद्बृंहिततामसानि,

Analyse क्षतानि च उद्बृंहितानि च क्षतोद्बृंहितानि तादृशानि तामसानि यैस्तानि 'The darkness whereof was dissipated and grown respectively.' Dissipated by रक्ताश्मभि and grown by नीलोपलै, and hence the rise of क्रोध and प्रमोद in succession. रक्ताश्मनीलोपलतोरणानि—Analyse रक्ताश्च ते अश्मानश्च रक्ताश्मान । नीलाश्च ते उपलाश्च नीलोपला । रक्ताश्मनीलोपलानां तोरणानि रक्ताश्मनीलोपलतोरणानि, 'Arches or arch-gates built of red and black stones (or marbles).' क्रोधप्रामोदौ—Analyse क्रोधश्च प्रमोदश्च क्रोधप्रमोदौ 'Anger and delight.' नारीजनस्य—Analyse नार्य एव जनो नारीजन तस्य, 'To the multitude of women' विभाभि 'By means of the bright splendour.' यत्र रक्ताश्मनीलोपलतोरणानि विभाभिर्नारीजनस्य क्रोधप्रमोदौ विदधु 'Where, by means of their bright splendour, the arch-gates built of red and black marbles, the darkness whereof was dissipated and grown respectively, provoked anger and gave delight to multitudes of women wandering at night'

